T. S. No. 992 I. Substance — Paper. Size — 13 × 5½ inches. Sheets—2 (5-6). Lines—11 to a page. Script—Devanāgari. No. of Granthas—15. Author ? Complete.

Beginning:

ह्रीमत्या शिवया विराण्मयमयं हृत्पङ्कजस्थं सदा
ह्रीणानां शिवकीर्तने हितकरे हेलाह्रदामानिनाम् ।
ह्रीम्वेरादिसुगन्धवस्तुरुचिरं हेमाद्रिवाणासनं
ह्रीङ्कारादिकपादपीठममलंह्रद्यं नटेशं भजे ॥

End:

मायाश्रीविलसत्सु चिदम्बरमहापञ्चाक्षरैरङ्कितान्
श्लोकान्सप्त पठन्ति येऽनुदिवसं चिन्तामणीर्नामकान् ।
तेषां भाग्यमनेकमायुरधिकं विद्यावरान्संस्थितान्
सर्वाभीष्टमसौ ददाति सहसा श्रीचित्सभाधीश्वरम् ॥

Colophon:

इति श्रीचिदम्बराष्टकं सम्पूर्णम् ।

Subject: Praise on Cidambareswara in eight slokas.

Remarks: The Previous Mss. are not available. So this Ms. is fully catalogued with same title. The Ms. is in good condition.

॥ ज्वरहरस्तोत्रम् ॥

22253. JWARAHARA STOTRAM

Not noticed by Burnell No. 13306. Substance—Paper. Size—8×5½ inches. Sheets—4. Lines—12 to a page. Script—Devanagari. No. of Granthas—80. Author? Complete.

Beginning:

श्रीलक्ष्मीनृसिंहाय नमः ।
वैशम्पायन उवाच –
भज्यमानेष्वनीकेषु त्रातुकामस्समभ्ययात् ।
ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ॥

End:

वरं लब्ध्वा ज्वरो हृष्टः कृत्वा च समयं पुनः ।
प्रणम्य मनसा कृष्णमपाक्रामत्ततो रणात् ॥

Colophon:

इति हरिवंशे ज्वरहरस्तोत्रेऽध्यायः । सम्पूर्णम् ।

Subject: Praise on Jwarahara alise God Siva from the Harivamsa.

Remarks : The Ms. is in good condition.

JWARAHARA STOTRAM

D.Nos:	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22254	N.N.B. 13307	Paper	D.Nagari	80	3	Same as 22253
22255	„ 13308	„	„	80	8	„
22256	„ 13309	„	„	40	4	„ But This is incomplete
22257	„ 13310	„	„	80	5	Same as 22253
22258	„ 13311	„	„	20	2	„ The Ms. contains only stotra without story.
22259	„ 13535	„	„	10	1	The Ms. contains only Japyeswara stotra
22260	„ T.S. 827	„	„	60	5	Same as 22253 But wants beginning So this is incomplete
22261	„ T.S. 869	„	„	60	7	Same as 22253 But this Ms. has no three page. So, is incomplete.

॥ तारावलीस्तोत्रम् ॥

22262. TĀRĀVALI STOTRAM

T.S. Collection No. 920. Substance—Paper. Size—11×4½ inches. Sheets—3. Lines—8 to a page. Script—Devanagri. No. of Granthas—50. Author? Complete.

Begining:

श्री गणेशाय नमः । तारावलिस्तुतिः ।
निरवधिकरुणार्द्रैः निह्नुताशेषदोषैः
अमृतरसझराणां अन्तरङ्गैरपाङ्गैः ।
अघमखिलमपास्यन्नस्य डिम्भस्य शम्भुः
सकलभयनिवृत्तिं साम्बमूर्तिर्विधत्ताम् ॥

End:

तारावलिस्तुतिमिमां तरुणेन्दुमौलेः
शृण्वन्ति ये भुवि पठन्ति शिवस्स तेषाम् ।
दीर्घायुरुन्नतविभूतिसुतर्धिशम्भु-
भक्त्याद्यभीष्टमखिलं प्रददाति हृष्टः ॥

Colophon:

तारावलिस्स्तुतिः सम्पूर्णा ।

Subject: Praise on Siva named Taravali

Remarks: The Ms. is in very good condition.

॥ त्यागराजकवचम् ॥

22263. TYĀGARAJAKAVACAM

Burnell's Catalogue No. 1450. Substance—Paper. Size—15½×6½ Inches. Sheets—3. Lines—8 to a page. Script—Devanagari. No. of Granthas—35. Author? Complete.

Beginning:

श्री गणेशाय नमः ।
शीलयन्ति यदुपासनमादौ
देवतान्तरमुपासितुकामाः ।
तत्वमेव न ददासि किमिष्टं
विघ्नराज विदुषामपि मोहः ॥

End.

सर्वदा सर्वकालेषु स मे सन्निहितो भवेत् ।
इत्येवं कवचं पुण्य सर्वसम्पत्प्रदायकम् ॥
अथ विष्णुकृतसोमास्कन्दशिवस्तुतिः—
सोमास्कन्दं परं धाम सोमार्धकृतशेखरम् ।
मुचुकुन्दतपोवल्लीमूलकन्दमुपास्महे ॥

Colophon: Nil

Subject: Praise on Tyagarāja

Remarks: The Ms. is in good condition.

॥ त्यागराजकवचम् ॥

22264. TYĀGARĀJAKAVACAM

Burnell's Catalogue No. 8393. Substance—Paper. Size—5×3 inches. Sheets—8. Lines—6 to a page. Script—Devanagari. No. of Granthas—50. Author? Complete.

Beginning:

श्रीगुरुचरणारविन्दाभ्यां नमः ।
यस्याज्ञां शिरसा वहन्कमलजः सृष्टिं विधत्तेऽद्भुतां
पद्माक्षस्तनुते समस्तजगतः त्राणं सदा श्रीपतिः ।
रुद्रो जागरितां स्वकृत्यकुशलस्तस्मात्तुरीयः शिवः
तं वन्दे जगतां प्रभुं त्रिणयनं त्यागाधिराजं शिवम् ॥

End :

त्यागराजसमो देवः देवेषु च न विद्यते ।
देवतीर्थसमं तीर्थं नास्ति नास्तीति निश्चयः ॥

Colophon :

इति श्रीपाद्मपुराणे पूर्वभागे श्रीत्यागराजकवचं सम्पूर्णम् ।
श्रीगुरुचरणारविन्दाभ्यां नमः ।

Subject : Praise on Tyagaraja from the Padmapurana.

Remarks : The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ त्यागराजकवचम् ॥

22265 TYĀGARĀJAKAVACAM

Not noticed by Burnell No. 12466. Substance—Paper. Size—10×5 inches. Sheets—6. Lines—9 to a page. Script — Devanagari. No. of Granthas—35. Author ? Complete.

Beginning, end, colophen, subject and remarks—Same as 22263.

॥ त्यागराजस्तोत्रम् ॥

22266. TYĀGARĀJA STOTRAM

Burnell's Catalogue No. 8891. Substance—Paper. Size—4×3 inches. Sheets—13. Lines—7 to a page. Script—Devanagari. No. of Granthas—75. Author—Kaviswara. Complete.

Beginning:

श्रीशौनक उवाच —
सूत सूत पुराणार्थंविशारद महामते ।
त्यागराजस्य देवस्य कवचं तुष्टिदं परम् ॥

End:

नित्यानित्यविवेकशून्यहृदयं वैराग्यदूरं श्रम
श्रद्धाशान्तिदयादिभिर्विरहितं सद्देशिकासेविनम् ।
वेदान्तार्थविचारलेशविमुखं सन्मार्गहीनं सदा
त्यागाधीशमहाप्रभो करुणया भक्तार्तिहन् पाहि माम् ।

Colophon:

इति कवीश्वरकृत श्रीत्यागराजस्तुतिः ।

Subject: Praise on Tyāgarāja Compcsed by Kaviswara.

Remarks: The Ms is very nice and in good condition.

॥ त्यागराजस्तोत्रम् ॥

22267. TYĀGARĀJA STOTRAM

Not noticed by Burnell No. 13570. Substance—Paper. Size—10 × 4 inches. Sheets—2. Lines—8 to a page. Script— Devanagari. No. of Granthas—40. Author? Complete.

Beginning:

यस्मिन्निश्चलनिर्विकारिणि निजे सच्चित्सुखानन्तके
भाति स्थावरजङ्गमात्मकमिदं सच्छुक्तिकारूप्यवत् ।
उत्पत्तिस्थितिसंहृतित्रितयकृत् विश्वस्य यः कारणं
स्थित्वान्तर्हृदये प्रवर्तयति यः तं त्यागराजं भजे ॥

End :

श्लोकद्वादशमञ्जरीं विरचितां श्रीत्यागराजस्य यो
लीलातः प्रतिवासरं परिपठेदाकर्णयेद्वा सकृत् ।
तस्य स्याच्चिरजीवतोऽभयकुलं सत्पुत्रपौत्रान्वितं
श्रीविद्याजयवित्तकीर्तिकवितास्वारोग्यसत्सम्पदः ॥

Colophon:

इति श्रीत्यागराजस्तोत्रं सम्पूर्णम् ।
श्लोकद्वादशमञ्जरीस्तोत्रं त्यागराजस्य ।

Subject: Praise on Tyāgarāja in twelve slokas.

Remarks : The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ त्यागराजस्तोत्रम् ॥

22268. TYĀGARĀJA STOTRAM

Not noticed by Burnell No. 13591. Substance—Paper. Size—5 × 14½ inches. Sheets—1. Lines—28. to a page. Script—Devanagari. No. of Granthas—25. Author ? Complete.

Beginning :

फुल्लत्कल्हारमालाविलसितसुभुजप्रान्तरं स्वान्तपद्मे
स्ताटंकालंकृताङ्गं कनकमणिमहाभद्रपीठे निषण्णम् ।
विद्युद्दामप्रभान्तर्विलसितमनिशं वीरखड्गाभिरामं
सानन्दं स्कन्दगौरीयुतमतुलरुचिं भावये त्यागराजम् ॥

End :

कामं मङ्गलदेवतापतिनुतं कल्याणवाणीप्रदं
कामक्रोधमदादिभेदचतुरं कर्पूरगौरं परम् ।

सोमस्कन्दमहेश्वरं शुभकरं राजाधिराजेश्वरं
ताराराजविराजमानमकुटं त्यागाधिराजं भजे ॥

Colophon: Nil

Subject: Praise on Tyāgarāja

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ त्यागराजस्तोत्रम् ॥

22269. TYAGARAJA STOTRAM

Not noticed by Burnell No. 13592. Substance—Paper. Size—5 × 14½ inches. Sheets—1. Lines—26 to a page. Script—Devanagari. No. of Granthas—40. Author? Complete.

Beginning:

रुद्राणीकुचकुम्भसंभ्रममणिः बालेन्दुचूडामणिः
कण्ठे नीलमणिः समस्तविबुधव्रातैकरक्षामणिः ।
श्रीपद्मालयहारनायकमणिः वंशोत्थमुक्तामणिः
पायाद्देवशिखामणिः भवभयत्यागेशचिन्तामणिः ॥

End:

नमोऽस्तु देव्यै सुरवन्दितायै
हेमाद्रिजायै हरवल्लभायै ।
गौर्यै शिवायै शशिभूषणायै
नमोऽस्तु तस्यै वरदप्रियायै ॥

Colophon: Nil

Subject: Praise on Tyagaraja

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ त्यागराजस्तोत्रम् ॥

22270. TYĀGARĀJA STOTRAM

Not noticed by Burnell No. 13594. Substance-Paper. Size—5×15½ inches. Sheets—1. Lines—29 to a page. Script—Devanagari. No. of Granthas—40. Author ? Complete.

Beginning: Same as 22268.

End:

नङ्गामञ्जुलतुङ्गपीनकठिनोरुज्यातचक्रद्वयी-
भ्राजत्कुङ्कुमपङ्कमुद्रिततलं पादारविन्दद्वयम् ।
श्रीत्यागेशविभोस्सुरासुरनतं लीलाविशेषारुणं
गाढं नस्सततं तनोतु नितरां कल्याणपारम्परीम् ॥

Colophon Nil.

Subject: Praise on Tyagaraja.

Remarks: The Ms. is different from the previous with the same title. The Ms. is in good condition.

॥ त्यागराजस्तोत्रम् ॥

22271. TYĀGARĀJA STOTRAM

Not Noticed by Burnell No. 13595. Substance—Paper. Size—16½×5½ inches. Sheets—1. Lines—26 to a page. Script—Devanagari. No. of Granthas—20. Author ? Complete.

Beginning:

गङ्गां तुङ्गतरङ्गसङ्गजनितध्वानेन रोधोरुधा-
ब्रह्माण्डान्तरवर्तिजीवनिवहत्रासप्रदां शीघ्रगाम् ।

दूर्वाग्रस्थितहैमबिन्दुसदृशीं कृत्वा दधौ मस्तके
तं वन्दे जगतां प्रभुं त्रिणयनं त्यागाधिराजं शिवम् ॥

End:

यस्यास्ते कमलालये मणिगृहं नूत्नप्रसूनोत्कटं
ताटङ्कं नवरत्नकोटिविलसत्सिंहासनं सुप्रभम् ।
माल्यं यस्य सुमल्लिकासमलसत्कल्हारगर्भं सदा
तं वन्दे जगतां प्रभुं त्रिणयनं त्यागाधिराजं शिवम् ॥

Colophon: Nil

Subject: Praise on Tyagaraja.

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in bad condition.

॥ त्यागराजसहस्रनाम ॥

22272. TYĀGARĀJA SAḤASRANĀMA

Burnell's Catalogue No. 7441. Substance—Paper. Size—7×4 inches. Sheets—29. Lines—9 to a page. Script—Devanagari. No. of Granthas—200. Author? Complete.

Beginning:

श्री गणपतये नमः ।

अनेजते नमः	अव्यक्ताय नमः
अच्युताय नमः	अबाह्याय नमः

End:

क्षीराय नमः	क्षणाय नमः
क्षिप्राय नमः	त्यागेश्वराय नमः
क्षित्यै नमः	प्रतापरामचन्द्रस्वामिने नमः

Colophon: Nil

Subject: 1000 sacred names of Tyagaraja.

Remarks: The Ms. contains only Namavali and this is in good condition.

॥ त्यागराजाष्टकम् ॥

22273. TYĀGARĀJĀṢṬAKAM

Burnell's Catalogue No. 8479 Substance—Paper. Size—14½×5 inches. Sheets—1. Lines—15 to a page. Script—Devanāgarī. No. of Granthas—15. Author—Devendra. Complete.

Beginning:

श्रीमत्यागमहेशदिव्यचरितं सन्तानसौख्यप्रदं
दीर्घायुष्यकरं सदा शुभकरं साम्राज्यलक्ष्मीकरम् ।
लोकानन्दकरं समस्तजनतासत्कीर्तिविद्याकरं
श्रोतृणामनवद्यहृद्यफलद कल्याणसम्पत्करम् ॥

End:

देवेन्द्रेण कृतं स्तोत्रं त्यागराजस्य सन्निधौ ।
इह लोके सुखी भूत्वा सर्वान्कामानवाप्नुयात् ॥

Colophon: Nil

Subject: Praise on Tyagaraja in eight slokas.

Remarks: The Ms. is in good condition.

॥ त्यागराजाष्टकम् ॥

22274 TYĀGARĀJAṢṬAKAM

Burnell's Catalogue No. 8480. Substance—Paper. Size—4×13½ inches. Sheets—1. Lines—25 to a page. Script—Devanagari. No. of Granthas—25. Author ? —Trayambaka Bhatta. Complete.

Beginning :

द्रष्टुं पर्वणि यं समुत्कमनसः श्रीव्याघ्रपादादयः
धीमन्तो मुनयः सुराश्च सकला दैत्याश्च वाणादयः ।
गन्धर्वा उपवीणयन्ति सततं यं देववर्यं शिवं
तं वन्दे जगतामधीशममलं त्यागाधिराजं विभुम् ॥

End :

यश्चाष्टकं पठति भक्तियुतः प्रभाते
त्यागाधिराजपदपद्मयुगं विचिन्त्य ।
तस्यायुषो भवति वृद्धिरुपैति लक्ष्मीः
पुत्रस्नुषापुत्रसहितो विमला च कीर्तिः ॥

Colophon :

त्र्यम्बकभट्टकृत

Subject : Praise on Tyagaraja in eight slokas.

Remarks: The Ms. is different from the previous one with the same title. The Ms is in good condition.

॥ त्यागराजाष्टकम् ॥

22275. TYĀGARĀJAṢṬAKAM

Burnell's Catalogue No. 8554. Substance—paper Size—4½×3½ inches. Sheets—2 (8-9). Lines—10 to a page. Script—Devanagari. No. of Granthas—20. Author ? Complete.

Beginning:

श्री गणेशाय नमः । श्री त्यागराजाय नमः ।
चन्द्रार्धचूडाय सदाशिवाय चन्द्रार्कवह्नित्रयलोचनाय ।
मायाविलासाय महेश्वराय त्यागाधिराजाय नमश्शिवाय ॥

End:

त्यागाधिराजाष्टकमेव नित्यं भूमौ पठेद्यः शिवसन्निधाने ।
दीर्घायुरारोग्यसुपुत्रसम्पदः प्राप्येह भोगान् शिवमेति सोऽन्ते ॥

Colophon: Nil.

Subject: Praise on Tyagaraja in eight slokas.

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ त्यागराजाष्टकम् ॥

22276. TYĀGARĀJAṢṬAKAM

Not noticed by Burnell No. 12675. Substance—Paper. Size—5×15 inches. Sheets—1. Lines—30 to a page. Script—Devanagari. No. of Granthas—25. Author ? Complete.

Beginning, End, Colophon, Subject and remarks same as 22274.

॥ त्यागराजाष्टकम् ॥

22277. TYĀGARĀJAṢṬAKAM

P. A. Collection No. 201 a. Substance—Paper. Size—$6\frac{1}{2}$×4 inches. Sheets—1. Lines—11 to a page. Script—Devanagari. No. of Granthas—15. Author—Devendra. Complete.

Beginning, End, Colophon Subject and remarks same as 22273.

॥ त्यागराजस्तोत्रम् ॥

22278. TYĀGARĀJA STOTRAM

Not noticed by Burnell No. 13593. Substance—Paper. Size—5×15 inches. Sheets—1. Lines—24 to a page. Script—Devanāgari No. of Granthas—15. Author ? Complete.

Beginning:

श्रीकण्ठः कमलासनार्चितपद श्रीपुत्ररूपाधिक
श्रीनाथेन्द्रसुरासुरावलिनत श्रीकीर्तिविद्याप्रद ।
श्रीराजन् मुचुकुन्दराजवरद श्रापट्टणाधीश्वर
त्यागेशो नितरां करोतु भगवान् कल्याणपारम्परीम् ॥

End:

नङ्गामञ्जुलतुङ्गपीनकठिनोरूजातचक्रद्वयी-
भ्राजत्कुङ्कुमपङ्कमुद्रिततलं पादारविन्दद्वयम् ।
श्रीत्यागेश विभो सुरासुरनुतं लीलाविशेषारुणं
गाढन्नोऽपि सदा तनोतु नितरां कल्याणपारंपरीम् ॥

Colophon: Nil.

Subject: Praise on Tyāgaraja.

Remarks: The Ms. is catalogued separately in D. 22278. But Ms. contains the matter as 22270 with slight change.

॥ दक्षिणामूर्तिकवचम् ॥

22279. DAKṢHIṆĀMŪRTI KAVACAM

Burnell's Catalogue No. 8388. Substance—Paper. Size—$5\frac{1}{2}\times2\frac{1}{2}$ inches. Sheets—7. Lines—5 to a page. Script—Devanagari. No. of Granthas—35. Author—Vāmakēśwara. Complete.

Beginning:

श्री गणेशाय नमः ।

ब्रह्मा उवाच—

शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतरं महत् ।
दक्षिणामूर्तिदेवस्य कवचं च वदाम्यहम् ॥

End:

तस्मात्किं बहुनोक्तेन कवचं धारयेद्यदि ।
सर्वान् कामानवाप्नोति चान्ते मुक्तिर्न संशयः ॥

Colophon :

इति श्रीवामकेश्वरविरचितं दक्षिणामूर्तिकवचं सम्पूर्णम् ।

Subject: Praise on Dakshinamurti in the type of Kavaca.

Remarks: The Ms. is in good condition.

॥ दक्षिणामूर्तिकवचम् ॥

22280. DAKṢHIṆĀMŪRTI KAVACAM

Burnell's Catalogue No. 8389. Substance — Paper. Size — 9½×4 inches. Sheets—2. Lines—8 to a page. Script—Devanagari. No. of Granthas—25. Author ?. Incomplete.

Beginning:

श्री गणेशाय नमः ।

अस्य श्री दक्षिणामूर्तिकवचस्य, ब्रह्मा ऋषिः, गायत्रीच्छन्दः, मेधादक्षिणामूर्तिर्देवता, मेधा बीजं, स्वाहाशक्तिः, दक्षिणामूर्तिरिति कीलकम् ।

अस्मिन् सिंहासने विद्यापीठे त्वासीनमीश्वरम् ।
दक्षिणाभिमुखं देवं वटच्छायानिवासिनम् ॥

End :

आपन्नो म हरः पातु पातु सर्वाङ्गमीश्वरः ।
य इदं कवचं देवि पर ... ... ॥

Colophon : Nil

Subject : Praise on Dakshinamurti in the type of Kavaca.

Remarks : The Ms. is different from the previous one with the same title. The Ms. wants an ending and so this is incomplete.

॥ दक्षिणामूर्तिकवचम् ॥

22281. DAKṢHIṆĀMŪRTI KAVACAM

Burnell's Catalogue No. 8390. Substance—Paper. Size—10×3½ inches. Sheets—1. Lines—9 to a page. Script—Devanagarl. No. of Granthas—20. Author ? Complete.

Beginning:

अस्य श्री दक्षिणामूर्तिपञ्जरमहामन्त्रस्य, शुक्र ऋषिः, अनुष्टुप्छन्दः,
श्री दक्षिणामूर्तिर्देवता ।
(अथ ध्यानम्)
मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्नाननं
मुक्ताहारविभूषणं शशिकला भास्वत्किरीटोज्ज्वलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तनिवासिनं सुरगुरुं ध्यायेदभीष्टाप्तये ॥

End :

जपेदवश्यं विद्यार्थी ग्रहणे चन्द्रसूर्ययोः ।
दक्षिणामूर्तिदेवस्य प्रसादात्पण्डितो भवेत् ॥

Colophon:

इति श्रीदक्षिणामूर्तिकवचं सम्पूर्णम् ।

Subject: Praise on Dakshinamurti in the type of Kavaca.

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in fairly good condition.

DAKṢHIṄĀMŪRTI KAVACAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
	N.N.B.					
22282	12451	P	D.Nag.	20	3	Same as22280 The Ms. is com_
22283	12452	,,	,,	20	10	,,
22284	12453	,,	,,	20	1	,,

॥ दक्षिणामूर्तिनवरत्नमालिका ॥

22285 DAKṢHINĀMŪRTI NAVARATNAMALIKA

Burnell's Catalogue No. 8843. Substance—Paper. Size—5½ × 3 inches. Sheets—4. Lines—6 to a page. Script—Devanagari. No. of Granthas —20. Author—Sri Sankara. Complete.

Beginning:

श्री गणेशाय नमः ।

अक्षमालां सुधाकुम्भं पुस्तकं ज्ञानमुद्रिकाम् ।
बिभ्रते शुभ्रवर्णाय दक्षिणामूर्तये नमः ॥

End :

एतां मालां नवमणिरूपामादिगुरोः
भक्त्या युक्तः पठति हि यो जाड्यविमुक्तः ।
अष्टाचत्वारिंशन्मुनिसाहस्रसमत्वं
गत्वा तस्मिन्विलयमुपैति स धन्यः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्य विरचिता श्रीदक्षिणामूर्तिनवरत्नमालिका सम्पूर्णा । श्रीरस्तु ।

Subject : Praise on Dakshinamurti in Nine slokas.

Remarks : The Ms. is in good condition

———

॥ दक्षिणामूर्तिपञ्चरत्नम् ॥

22286. DAKṢHIṆĀMŪRTI PAÑCARATNAM

Burnell's Catalogue No. 8941. Substance—Paper. Size—$8\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets - 1. Lines—9 to a page. Script—Devanagari. No. of Granthas—15. Author—Sri Dhurndhara Durga. Complete.

Beginning :

श्रीगणेशाय नमः ।

ब्रह्मोपेन्द्रमहेन्द्रवन्द्यभगवन् न्यग्रोदधमूलस्फुर-
न्माणिक्य प्रतिनद्धहेमविलसत्पीठाधिवासोद्धर ।
चिद्ब्रह्मामृतपूरपूर्णविकसद्ब्रह्मसद्माश्रित
त्वमीडेऽमरसेव्यदीव्यविभवन् श्रीदक्षिणामूर्तिमन् ॥

End :

प्राप्तास्तत्र लयं भृशं हरिहरब्रह्मादिवृन्दारकाः
यद्वेदानधिगम्य वैभवमनुप्राप्तासनाध्यासित ।

चिन्मुद्राञ्चिततारकाक्ष्यनुभवब्रह्मैकभावोद्भव
त्वामीडेऽमरसेव्यदीव्यविभवन् श्रीदक्षिणामूर्तिमन् ॥ ५ ॥

Colophon:

इति श्रीधुरन्धरदुर्गाविरचितं दक्षिणामूर्तिपञ्चरत्नं समाप्तम् ।
श्रीरस्तु ।

Subject: Praise on Dakshinamurti in five slokas.

Remarks: The Ms. is in good condition.

॥ दक्षिणामूर्तिपञ्जरम् ॥

22287. DAKṢHIṆĀMŪRTI PAÑJARAM

Burnell's Catalogue No. 8938. Substance—Paper. Size—4½×3 inches. Sheets—7. Lines—8 to a page. Script—Devanagari. No. of Granthas—50. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।
प्रणम्य साम्वमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

End:

तस्मात्सर्वप्रयत्नेन मोक्षार्थी सर्वदा पुमान् ।
इदमावर्तयेन्नित्यं दक्षिणामूर्तिपञ्जरम् ॥

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे गुहनारदसंवादे दक्षिणामूर्तिपञ्जरं
नाम अष्टादशोऽध्यायः ।

Subject: Praise on Dakshinamurti from the Brahmandapurana.

Remarks: The Ms. is in good condition.

॥ दक्षिणामूर्तिपञ्जरम् ॥

22288. DAKṢHIṆAMŪRTI PAÑJARAM

Burnell's Catalogue No. 8939. Substance — Paper. Size— $6\frac{1}{2} \times 4$ inches. Sheets — 2. Lines — 8 to a page. Script— Devanagari. No. of Granthas — 10. Author ? Complete.

Beginning :

श्रीगणेशाय नमः ।

विद्येश उवाच — चिदानन्दबोधं हरं पार्वतीशं
शिवं शङ्करं सर्वविश्वैकसाक्षिम् ।
विभुं विश्वरूपं निराकाररूपं
परं दक्षिणामूर्तिमीशं नतोऽस्मि ॥

End :

वाचां सिद्धिं च लभते त्रिसन्ध्यं यः पठेन्नरः ।
षण्मासान्नात्र सन्देहः सत्यं सत्यं वदाम्यहम् ॥

Colophon :

इति श्रीकाशीखण्डे दक्षिणामूर्तिपञ्जरं नाम त्रयोदशोऽध्यायः ।

Subject : Praise on Dakshinamurti from the Kasikhanda of Skanda.

Remarks : This Ms. is different from the previous one with the same title. The Ms. is in good condition.

DAKṢHIṆAMŪRTI PAÑJARAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22289	12248 N.N.B.	PL.	Gran.	50	7	same as 22287
22290	13667 c	P	D. Nag.	50	6	,,
22291	J.L. 80/835	,,	,,	50	10	,,

॥ दक्षिणामूर्तिस्तवः ॥

22292. DAKṢHIṆĀMŪRTISTAVAḤ

Burnell's Catalogue No. 8943. Substance—Paper. Size—9½×4 inches. Sheets—2. Lines—8 to a page. Script—Devanagari. No. of Granthas 25. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।
ओं नमः परमार्थाय शुद्धज्ञानस्वरूपिणे ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः

End:

एवं सकृत्पठेद्विद्वान्प्रत्यहं यस्समाहितः ।
विशुद्धस्सर्वपापेभ्यः याति ब्रह्म सनातनम् ॥

Colophon:

श्री दक्षिणामूर्तिब्रह्मणे नमः ।

Subject: Praise on Dakshinamurti.

Remarks: The Ms. is in good condition

॥ दक्षिणामूर्तिस्तवराजः ॥

22293. DAKṢHIṆĀMŪRTI STAVARAJAḤ

Not noticed by Burnell No. 15114 (Tag. 90-I) Substance—Palm Leaf. Size—12×½ inches. Leaves—6 (5-10) Lines—3 to a Page. Script — Grantha. No. of Granthas—15. Author—Sri Sankara. Complete.

Beginning:

उपासकानां सदुपासनीयं उपात्तवासं वटशाखिमूले ।
तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्ति चित्ते मम बोधरूपम् ॥

End:

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्दुनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम् ।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतम्
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ॥

Colophon:

इति श्री भगवत्पादकृतः श्रीदक्षिणामूर्तिस्तवराजः समाप्तः ।
श्रीरस्तु ।

Subject: Praise on Dakshinamurti Composed by Sri Sankara.

Remaraks: The Ms. is in bad condition.

॥ दक्षिणामूर्तिस्तोत्रम् ॥

22294. DAKṢHIṆĀMŪRTI STOTRAM

Burnell's Catalogue No. 8942. Substance—Paper. Size—5×3½ inches. Sheets—5. Lines—6 to a page. Script—Devanagari. No. of Granthas—25. Author—Sri Sankara. Complete.

Beginning:

श्रीगणाधिपतये तमः ।
उपासकानां यदुपासनीयं उपात्तवासं वटशाखिमूले ।
तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्तु चित्ते मम बोधरूपम् ॥

End:

दैवतानि कति सन्ति नावनौ नैव तानि मनसा मतानि नः ।
दीक्षितं जडधियामनुग्रहे दाक्षिणाभिमुखमेव दैवतम् ॥

Colophon:

इति भगवत्पूज्यपादकृतं दक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ।
श्रीकृष्णार्पणमस्तु ।

Subject: Praise on Dakshinamurti composed by Sri Sankara.

Remarks: The Ms. is in good condition.

———

॥ दक्षिणामूर्तिस्तोत्रम् ॥

22295. DAKṢHIṆAMŪRTI STOTRAM

Not noticed by Burnell No. 15103 (Tag. 80 I). Substance—Palm Leaf. Size 16 × 1½ inches. Leaves—1. Lines—6 to a page. Script—Telugu. No. of Granthas—10. Author—Sri Sankara. Incomplete.

Beginning:

तत्वार्थमन्तेवसतामृषीणां युवापि यस्सन् उपदेष्टुमीष्टे ।
प्रणौमि तं प्राक्तनपुण्यजालैराचार्यमाश्चर्यदयानिधानम् ॥

End:

यस्ते प्रसन्नामनुसन्दधाति मूर्तिं मुदा मुग्धशशाङ्कमौले ।
अवद्यहीनां लभते स विद्यामतीव वेदान्तमहारहस्यम् ॥

Colophon:

दक्षिणामूर्तिस्तोत्रं समाप्तम् ।

Subject: Praise on Dakshinamurti composed by Sri Sankara.

Remarks: The Ms. is different from the previous one with the same title. The Ms. wants beginning and end. So this is an incomplete Ms. and in bad condition.

———

॥ दक्षिणामूर्त्यष्टकम् ॥

22296. DAKṢHINĀMŪRTYAṢTAKAM

Not noticed by Burnell No. 13670 b. Substance—Paper. Size — 4×2 inches. Sheets — 3. Lines — 7 to a page. Script — Devanāgarī. No. of Granthas — 25. Author — Sri Sankara. Complete.

Beginning:

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

End:

विश्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्धयेत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं दक्षिणामूर्त्यष्टकं सम्पूर्णम् ।

Subject: Praise on Dakshinamurti in eight slokas composed by Sri Sankaracharya.

Remarks: The Ms. is in good condition.

DAKṢHINĀMŪRTYAṢTAKAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22297	N.N.B. 15046 a (Tag.23)	PL	Gra.	25	1	Same as 22296 The Ms. is in fairly good condition.
22298	„ 15046 b (Tag.23)	„	„	25	1	„
22299	„ 15073 (Tag.50)	„	„	25	2	„
22300	„ 15077 (Tag.54)	„	Telugu	25	2	„
22301	„ 15107 (Tag.83)	„	Gra.	25	7	„ The Ms. contains commentary aiso
22302	„ 15117 (Tag.95)	„	Telugu	25	18	„ The Ms. contains commentary also, but Ms. is Incomplete.
22303	„ 15134 (Tag.113)	„	D Nag.	25	6	Same as 22296
22304	„ 15137 e (Tag.116)	„	Gra.	25	4	„ Incomplete
22305	J. L. 36/419	Paper	The Ms. is not available.			

॥ दक्षिणामूर्त्यष्टकम् ॥

22306. DAKṢHINĀMŪRTYAṢTAKAM

Not noticed by Burnell No. 15140 (Tag. 119). Substance—Palm Leaf. Size – 8 × 1¼ inches. Leaves—2 (91-92). Lines—8 to a page. Script – Grantha. No. of Granthas—15. Author—Sri Agastya. Complete.

Beginning:

कर्पूरगौरवपुषे कलया शशिनः कपर्दमंक्रियते ।
व्याघ्राजिनवसनवते ... ... यशस्विने महसे ॥

End:

अगस्त्याष्टवमेतदभीष्ठफलदायि दक्षिणामूर्तेः ।
यः पठति लिखति तूर्णं ईयात्सर्वज्ञमीश्वरात्सोऽपि ॥

Colophon :

इत्यगस्त्यकृतदक्षिणामूर्त्यष्टकं समाप्तम् ।

Subject : Praise on Dakshinamurti in eight slokas composed by Bhagavan Agastya.

Remarks : The Ms. is different from the previous one with the same title. The Ms. is in fairly good condition.

॥ दक्षिणामूर्त्यष्टोत्तरशतम् ॥

22307. DAKṢHINĀMŪRTYAṢTŌTTARA SATAM

Burnell's Catalogue No. 12091 ऋ. Substance — Palm Leaf. Size—7 × 1 inches. Leaves—3. Lines – 8 to a page. Script—Grantha. No. of Granthas - 50. Author ? Complete.

Beginnirg :

अस्य श्री दक्षिणामूर्तिदिव्यनामाष्टोत्तरशतमहामन्त्रस्य,
गुर्वन्तेवासी ऋषिः, अनुष्टुप्छन्दः, स्वयंप्रकाशो दक्षिणामूर्तिर्देवता ।
नारदं च मुनिश्रेष्ठं लोकरक्षाहितं श्रुतम् ।
ब्रह्मा प्रोवाच तनयं काकपक्षशिखान्वितम् ॥

End :

आधत्स्वैनं मुनिश्रेष्ठ वीणायां वद नित्यशः ।
नित्यं जपस्व मद्भक्त्या पूज्यो लोकेषु हे मुने ॥
इति शिवपुराणे पञ्चसप्ततितमोऽध्यायः ।

Colophon :

दक्षिणामूर्त्यष्टोत्तरशतं समाप्तम् । ओं शिवार्पणमस्तु ।

Subject: 108 Sacred namas of Dakshinamurti from the Saivapurana.

Remarks: The Ms. is in fairly good condition.

॥ दक्षिणामूर्त्यष्टोत्तरशतम् ॥

22308. DAKṢHINAMŪRTYAṢTOTTARA SATAM

J.L. Collection No. 101/564. Substance—Paper. Size—8×4¼ inches. Sheets—2. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—50. Author? Complete.

Beginning :

श्री गणेशाय नमः । श्री दक्षिणामूर्तये नमः ।
विद्यारूपी महायोगी शुद्धज्ञानी पिनाकधृक् ।
रत्नालङ्कृतसर्वाङ्गो रत्नमाली जटाधरः ॥

End:

एकपुष्पार्चनेनैव भगवानम्बिकापतिः ।
तुष्टस्सम्यङ्मनोऽभीष्टं दद्यादन्ते च मोक्षदम् ॥

Colophon:

इति श्रीशैवपुराणे दक्षिणामूर्त्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।
श्रीदक्षिणामूर्तिगुरवे नमः ।

Subject: 108 Sacred names of Dakshinamurti from the Saivapurana.

Remarks: The Ms. is same as 22307. But this does not contain Ṛshi, Chandas etc.

॥ दयाशतकम् ॥

22309. DAYĀŚATAKAM

T.S. Collection No. 920 G. Substance—Paper. Size— 11×4½ inches. Sheets—11 (18 to 28). Lines—8 to a page. Script—Devanagarī. No. of Granthas—200. Author ? Complete.

Beginning:

दयाशतकम् ।
श्रेयांसि सन्दिशति कन्दलयति अमन्द-
मानन्दमस्य दलयत्यघबृन्दमार्तीः ।
धूनोति किङ्करयति द्रुहिणादिकांश्च
मातस्तवेषदुदयो हि दये पुरारेः ॥

End:

एवं दमास्तवमिमं पठतां हि भक्त्या-
रोग्यायुराष्टशिवभक्तिधनर्धिविद्याः ।

आग्र्यान्सुतानपि यशश्च विमुक्तिमन्ते
श्रीपार्वतीशकरुणा दिशति प्रहृष्टा ॥

Colophon:

इति दयाशतकं सम्पूर्णम् ।

Subject: Praise on Daya of Parameśwara in 100 slokas.

Remarks: The Ms. is in very good condition.

॥ दारिद्र्यदहनाष्टकम् ॥

22310. DĀRIDRYADAHANĀṢTAKAM

Burnell's Catalogue No. 9829 c. Substance — Palm Leaf. Size—1 × 10 inches. Leaves—1 (62nd). Lines—5 to a page. Script—Grantha. No. of Granthas—15. Author? Incomplete.

Beginning:

विश्वेश्वराय नरकार्णवतारकाय
ज्ञानप्रदाय करुणामृतसागराय ।
कर्पूरकुन्दधवलाय जटाधराय
दारिद्र्यदुःखभवरोगविनाशकाय ॥

End:

भक्तप्रियाय भवरोगभवार्णवाय
दिव्याय दिव्यरसनाय गुणार्णवाय ।
तेजोमयाय निखिलागमसंस्तुताय
दारिद्र्यदुःखहरणाय नमश्शिवाय ॥

Colophon: Nil

Subject: Praise on God Siva named Daridryadahana in eight slokas.

Remarks: The Ms. has small and big leaves.

DĀRIDRYADAHANĀṢTAKAM

D. Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22311	N.N.B. 12710	Paper	D.Nag.	20	1	Same as 22310. But the Ms. contains other five slokas and Colophon says composed by Sri Sankara.
22312	„ 12724	„	„	20	2	„
22313	„ 12727	„	„	20	1	„ This Ms. contains composed by Vaṣiṣta.
22314	„ 12731	„	„	20	2	„
22315	„ 13667 b	„	„	20	4	Same as 22311
22316	„ 15382 (Tag.107G)	Palmleaf	Grantha	20	1	„

॥ दारिद्र्यदुःखदहनाष्टकम् ॥

22317. DĀRIDRYADUKHADAHANAṢTAKAM

Burnell's Catalogue No. 8464. Substance—Paper. Size—5 × 3½ inches. Sheets — 3. Lines—6 to a page. Script—Devanagari. No. of Granthas—15. Author—Sri Sankara. Complete.

Beginning: Same as 22310.

End:

मुक्ताय यज्ञफलदाय गणेश्वराय
सेवाप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमश्शिवाय ॥

Colophon:

अष्टकं समाप्तमाचार्यकृतम् ॥ ॥

Subject: Praise on God Siva named Daridryadahana in eight slokas composed by Sri Sankara.

Remarks: It is not known that why the Ms. is catalcgued separately in XIX Vol.. as Daridrya Dukha Dahanaṣtaka.

॥ द्वादशलिङ्गस्तोत्रम् ॥

22318 DWADAŚALINGA STOTRAM

Burnell's Catalogue No. 8664.

This Ms. is not available.

॥ द्वादशलिङ्गस्तोत्रम् ॥

22319. DWADASALINGA STOTRAM

Burnell's Catalogue No. 8433. Substance—Paper. Size — 7½×4½ inches. Sheets—2. Lines—9 to a page. Script— Devanagari. No. of Granthas—20. Author–Sri Sankara.

Complete.

श्रीगणेशाय नकः ।

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालं ओङ्कारममरेश्वरम् ॥

End.

एतानि लिङ्गानि सदैव मर्त्यः
प्रातः पठेन्निर्मलमानसश्च ।
ते पुत्रपौत्रैश्च धनैरुदारैः
सत्कीर्तिभाजस्सुखिनो भवन्ति ॥

Colophon:

इति श्रीशङ्कराचार्यविश्चितं द्वादशलिङ्गस्तोत्रं सम्पूर्णमस्तु ।

Subject: Praise on twenty Lingas composed by Sri Sankara.

Remarks: The Ms. is in fairly good condition.

॥ ध्रुवस्तुतिः ॥

22320. DHRUVASTUTIH

Burnells Catalogue No. 8750. Substance — Paper. Size — 7×4½ inches. Sheets—10. Lines—9 to a page. Script— Devanagari. No. of Granthas—125. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।

ध्रुव उवाच –नमो हिरण्य बाहवे सर्वसृष्टिविधायिने ।
हिरण्यरेतसे तुभ्यं सुहिरण्यप्रदायिने ॥

End:

नरो ध्रुवस्य चरितं प्रसङ्गेन स्मरन्नपि ।
न पापैरभिभूयेत महत्पुण्यमवाप्नुयात् ॥

Colophon:

इति काशीखण्डे ध्रुवस्तुतिर्नाम एकविंशतितमोऽध्यायः ।

Subject: Praise on Sri Vishnu by Bhakta Dhruva from the Kasikhanda.

Remarks: It is not known why this Vishnustotra is catalogued in the middle of the Siva stotras.

॥ नटेशाष्टोत्तरशतम् ॥

22321. NATĒSAṢṬŌTTRAŚATAM

G.K.D. No. 171. Substance—Paper. Size—5½ × 2½ inches. Sheets — 4. Lines — 9 to a page. Script — Devanagari. No. of Granthas—30. Author ? Complete.

Beginning:

ओं गणेश शारदा सद्गुरुभ्यो नमः ।
ओं चिदम्बरेश्वराय नमः (यै नमः)
,, हेमसभेश्वराय नमः (यै नमः)
,, चित्सभेश्वराय नमः (यै नमः)
,, चिदम्बरसभानाथाय नमः (यै नमः)

End:

दाम्नामष्टोत्तरशतं स्त्रीपुल्लिङ्गक्रमेण तु ।
सम्पूज्य देवीदेवेशौ भजेत्सर्वार्थसिद्धये ॥

Colophon:

रुधिरोद्गारि नाम संवत्सर, कार्तिक, वद्यचतुर्थी, भानुवार, चिदम्बरेण लिखितं शिवकामसुन्दरीसहित नटेशाष्टोत्तरशतं सम्पूर्णम् ।

Subject: 100 Sacred names of Natesa and Sivakamasundari.

Remarks: The Ms. is in good condition.

॥ नमस्स्तोत्रम् ॥

22322. NAMASSTOTRAM

J. L. Collection No. 36/449.

The Ms. is not available.

॥ नमस्काराष्टकम् ॥

22323. NAMASKĀRĀṢTAKAM

Burnell's Catalogue No. 8484. Substance—Paper. Size—10½×4 inches. Sheets – 1. Lines – 9 to a page. Script – Devanagari. No. Granthas – 15. Author? Complete.

Beginning:

श्री गणेशाय नमः ।

नमस्ते नीलकण्ठाय नमस्ते निर्मलाय च ।
नमस्ते पार्वतीशाय नमस्ते मारवैरिणे ॥

End:

य: पठेदग्रत: शम्भो: भुक्तिमुक्तिमवाप्नुयात् ।
इह भुक्त्वाऽखिलान्भोगान् सोऽन्ते शिवपुरं व्रजेत् ॥

Colophon:

इति श्रीस्कान्दे पुराणे नमस्काराष्टकं सम्पूर्णम् ।

Subject: Praise on God Siva in eight slokas from the Skānda.

Remarks: The Ms. contains Ardhanariswara Stotra also. Ms. is in good condition.

NAMASKARAŞTAKAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22324	N.N.B. 12665	Paper	D.Nag.	15	2	Same as 22323
22325	,, 12698	,,	,,	15	1	,,
22326	,, 12730	,,	,,	15	1	,, The Ms. contains "Siva-dwadasa nama" also.
22327	J.L. 127	,,	,,	15	3	,,
22328	J.L. ग		,,	This Ms. is not available.		

॥ नीलकण्ठस्तोत्रम् ॥

22329. NEELAKANTHA STOTRAM

Buruell's Catalogue No. 8882. Substance—Paper. Size—$4\frac{1}{2} \times 2\frac{1}{4}$ inches. Sheets—5. Lines—7 to a page. Script—Devanagari. No. of Granthas—25. Author? Complete.

Beginning:

ओं नमो भगवते । अस्य श्रीनीलकण्ठस्तोत्रमहामन्त्रस्य, ब्रह्मा ऋषिः, अनुष्टुप्छन्दः, श्रीनीलकण्ठः सदाशिवो देवता ।

❀ ❀ ❀ ❀ ❀ ❀ ❀

ओं नमो नीलकण्ठाय श्वेतशरीराय सर्वमालालंकृतभूषणाय, हुं फट् स्वाहा ।

End:

ये निर्भयं राजभय चोरभय व्याघ्रभय विनाशनाय मोहनमन्त्र आकर्षणादि परविद्या छेदकमन्त्र.....

Colophon:

वीरभद्रप्रोक्तं नीलकण्ठस्तोत्रमन्त्रं सम्पूर्णमस्तु ।

Subject: Praise on Neelakantha in type of Mantra.

Remarks: Some letters are not decipherable in the end of the Ms. The ms is in fairly good Condition.

———

॥ परमेश्वरध्यानम् ॥

22330. PARAMESWARA DHYANAM

Burnell's Catalogue No. 8884. Substance—Paper. Size—$4 \times 2\frac{1}{2}$ inches. Sheets—4. Lines—6 to a page. Script—Devanagari. No. of Granthas—15. Author? Complete.

Beginning:

गाले श्यामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणैस्स्तुतपदं ऋग्वेदनादोदयं
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

End:

एतानि षष्ठवदनानि महेश्वरस्य
ये कीर्तयन्ति मनुजाः सततं त्रिसन्ध्यम् ।
गच्छन्ति ते शिवपुरे रुचिरैर्विमानैः
क्रीडन्ति शङ्करगणैस्सततं शिवाख्यम् ॥

Colophon :

श्रीरस्तु ।

Subject : Praise on Pancamukha alias Parameswara.

Remarks : The Ms. is in good condition.

॥ परमेश्वरस्तुतिः ॥

22331. PARAMESWARA STUTIH

Burnell's Catalogue No. 8857. Substance—Paper. Size—$6\frac{1}{2} \times 4\frac{1}{4}$ Inches. Sheets - 4. Lines—8 to a page. Script—Devanagari. No. of Granthas—30. Author ? Complete.

Beginning:

श्री साम्बसदाशिवो जयतितराम् ।

ब्रह्मोवाच –

विश्वावसुर्विश्वमूर्तिर्विश्वेशो विष्वक्सेनो विश्वकर्मा वशी च ।
विश्वेश्वरो वासुदेवोऽसि तस्माद्योगात्मानं दैवतं त्वामुपैति ॥

End :

स्थिताश्च सर्वेत्वयि भूतसङ्घाः कृत्वाश्रयं त्वां वरदं सुबाहो ।
अनादिमध्यान्तमपारयोगं लोकस्य सेतुं प्रवदन्ति विप्राः ॥

Colophon:

इति भीष्मपर्वणि ब्रह्मकृतपरमेश्वरस्तुतिः सम्पूर्णा ॥

Subject : Praise on Parameswara composed by Bramha from the Mahabharata.

Remarks : The Ms. is in good condition.

PARAMESWARA STUTIH

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks.
22332	8937	P.	D. Nag.	30	1(312)	Same as 22331

॥ परमेश्वरस्तोत्रम् ॥

22333. PARAMESWARA STOTRAM

Not Noticed by Burnell No. 15114 (Tag. 90). Substance — Palm Leaf. Size—12×1 inches. Leaves—3 (11-13). Lines—3 to a page. Script—Grantha. No. of Granthas—30. Author—Sri Sankara. Complete

Beginning:

यन्निष्प्रपञ्चमपि निर्गुणमात्मसारं
यद्वचेकतस्स्वदमनं परमद्वितीयम् ।
सच्चित्सुखं शिवमपारमखण्डमेकं
तस्मै नमो भगवते परमेश्वराय ॥

End:

परतत्ववोधनपटीयसीमिमां
अनुसन्दधाति नवरत्नमालिकाम् ।
स विधूय संसृतितमःपरम्परां
परमेश्वरं भजति रूपमव्ययम् ॥

Colophon:

इति श्रीभगवत्पादशङ्कराचार्यविरचिता वेदान्तसार-
नवरत्नमालिका समाप्ता ।
वस्तु श्रीपुरवास्तव्यमस्तु शाहेन्द्र ते मुदे ।
नृत्यत्प्रतिपदं निष्कसहस्रं यत्प्रयच्छति ॥

Subject: Praise on Parameswara in nine slokas composed by Sri Sankara.

Remarks: The Ms. is in bad condition.

॥ परमेश्वरहारावलीस्तोत्रम् ॥

22334. PARAMESWARA HARAVALI STOTRAM

Not noticed by Burnell No. 15143 (Tag. 122).

Beginning: Forty stotras are available in this Ms. But Parameswara Haravali is not available. The Ms. contains as Vighneswara Haravali.

॥ परमशिवमन्त्रकवचम् ॥

22335. PARASIVAMANTRAKAVACAM

Burnell's Catalogue No. 12118. Substance—Paper. Size 16×1¼ inches. Sheets—6. Lines—9 to a page. Script—Devanagari. No. of Granthas—150. Author? Complete.

Beginning:

श्री गणेशाय नमः । अथ शैवागमे शिवोमासंवादे सर्वशिवमन्त्र-विग्रहरूप श्रीपराप्रासादकवचम् । ओं नमश्शिवाय ।

कैलासशिखरारूढं गिरीशं पार्वती शिवम् ।
पञ्चवक्त्रं त्रिणयनं नीलकण्ठं पिनाकिनम् ॥

End:

न तस्य दुष्करं किञ्चित् त्रिषु लोकेषु किञ्चन ।
पराप्रासादकवचमनादृत्य भजेच्छिवम् ॥

न तस्य वरदो देवो भजेत्सर्वार्तिहारिणम् ।

Colophon:

इति शैवागमे शिवोमासंवादे परशिवमन्त्रविग्रहकवचं सम्पूर्णम् ।

Subject: Praise on Paramasiva from the Saivagama.

Remarks: The Ms. is in fairly good condition.

॥ प्रज्ञावर्धनस्तोत्रम् ॥

22336. PRAGNAVARDHANA STOTRAM

Burnell's Catalogue No. 8524. Substance—Paper. Size—9½×3¼ inches. Sheets—1. Lines—6 to a page. Script—Devanagari. No. of Granthas—10. Author? Complete.

Beginning:

श्री गणेशाय नमः ।

अस्य श्रीप्रज्ञावर्धनस्तोत्रस्य, अगस्त्य ऋषिः, श्रीस्कन्दो देवता,
अनुष्टुप्छन्दः, मम प्रज्ञाविवर्धनार्थे जपे विनियोगः ।

योगीश्वरो महासेनः कार्तिकेयोऽग्निनन्दनः ।
स्कन्द कुमारस्सेनानीः स्वामि शङ्करसम्भवः ॥

End :

महामन्त्रमयानीह मम नामानि कीर्तयेत् ।
महाप्रज्ञामवाप्नोति नात्र कार्य विचारणा ॥

Colophon

इति श्री प्रज्ञावर्धनस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Subrahmanya for Pragñavardhana.

Remarks : The Ms. is in good condition.

॥ प्रदोषस्तोत्रम् ॥

22337. PRADOṢA STOTRAM

Burnell's Catalogue No. 8576. Substance—Paper. Size—4 × 2½ inches. Sheets—5. Lines—5 to a page. Script—Devanagari. No. of Granthas—15. Author ? Complete.

Beginning:

श्रीसाम्बाय नमः ।

सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीमि उपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तुः
सारोऽयमीश्वरपदाम्बुजसेवनेन ॥

End:

अतो दरिद्रमापन्नः पुत्रस्ते द्विजभामिनि ।
तद्दोषपरिहारार्थं शरणं यातु शङ्करम् ॥

Colophon:

इति श्रीस्कन्दपुराणे ब्रह्मोत्तरखण्डे प्रदोषस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Parameswara for reading in Pradhoṣa from the skānda.

Remarks: The Ms. is in good condition.

॥ प्रदोषस्तोत्रम् ॥

22338. PRADOṢA STOTRAM

Burnell's Catalogue No. 8577. Substance—Paper. Size—8½×4 inches. Sheets—2. Lines—6 to a page. Script—Devanāgari. No. of Granthas—10. Author? Complete.

Beginning:

श्री गणेशाय नमः ।
जय देव जगन्नाथ जय शङ्कर शाश्वत ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ॥

End:

नश्यन्तु दस्यवो राष्ट्रे जनास्सन्तु निरापदः ।
दुर्भिक्षमरिसन्तापः शमं यातु महीतले ॥
सर्वसस्यसमृद्धिश्च भूयात्सुखमनामयम् ।

Colophon:

इति स्कन्दपुराणे ब्रह्मोत्तरखण्डे प्रदोषस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Parameswara from the Skandapurana.

Remarks: The Ms. is different from the previous with the same title. The Ms. is in good condition.

PRADOṢA STOTRAM

D.No.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22339	8937	Paper	D.Nag.	15	1	Same as 22337
22340	12801	,,	,,	10	4	Same as 22338
22341	12802	,,	,,	15	3	Same as 22337
22342	12803	,,	,,	15	3	,,
22343	12804	,,	,,	15	2	,,
22344	12848 a	,,	,,	10	3	Same as 22338
22345	N.N.B. 13517	,,				The Stora is not available in the Ms. Ms. contains only Sivastotram in D. 22912.
22346	,, 13670	,,	,,	25	3	Same as 22337 and 22338
22347	J.L. 36/449	—	—	—	—	This Ms. is not available.
22348	T.S. 992	,,	,,	15	1	Same as 22337
22349	G.K.D. 235	,,	,,	10	1	Same as 22338

॥ प्रातस्स्तुतिः ॥

22350. PRĀTASTUTIH

Burnell's Catalogue No. 12175(आ). **Substance**—Palm Leaf. **Size**—18½ × 1½ inches. **Leaves**—1 (14th). **Lines**—5 to a page. **Script**—Telugu. **No. of Granthas**—25. **Author** ? **Complete.**

Beginning :

नमस्ते नाथभगवन् शिवाय शिवरूपिणे ।
विद्यावतारसंसिद्धयै स्वकृतानेवविग्रह ।
नवाय नवरूपाय परमार्थस्वरूपिणे ।

End:

यः श्लोकपञ्चकमिदं त्रिपुराम्बिकायाः
प्रातः पठेदनुदिनं निजभक्तियुक्तः ।
भुक्त्वाणिमादिकमिहाखिलपापमुक्तः
श्रीशाम्भवं पदमवाप्स्यति सोऽवसाने ॥

Colophon : Nil

Subject : Praise on Paramasiva, Parameswari and Tripura-Sundari.

Remarks : 1 to 5 slokas of Siva, 1 to 12 slokas of Devi and 1 to 6 slokas of Tripurasundari – These stotras are called as Prātastutih. The Ms is fairly in good condition.

———

॥ प्रातस्मरणस्तोत्रम् ॥

22351. PRATASSMARANA STOTRAM

J. L. Collection No. 128/591. Substance—Paper. Size—4½ × 3 inches. Sheets—3. Lines—6 to a page. Script—Devanagari. No. of Granthas—10. Author? Complete.

Beginning: First page is not traceable.

प्रातस्स्मरामि हरचारुमुखारविन्दं
कुन्दालिसुन्दररदावलिमन्दहासम् ।
चन्द्रानलार्कनयनं भुजगावतंसं
दाक्षायणीक्षणचकोरकचन्द्रबिम्बम् ॥२॥

End:

पञ्चवक्त्रस्य यः श्लोकपञ्चकं नियतं पठेत् ।
प्रभाते परया भक्त्या प्रमोदप्रमदो भवेत् ॥

Colophon: Nil

Subject: Praise on Parameswara in five slokas.

Remarks: The Ms. is in bad condition.

॥ पार्वतीपरमेश्वरध्यानम् ॥

22352. PĀRVATĪ PARAMĒSVARA DHYĀNAM

Burnell's Catalogue No. 8874. Substance—Paper. Size—3½ × 1½ inches. Sheets—5. Lines—4 to a page. Script—Devanagari. No. of Granthas—20. Author? Complete.

Beginning:

श्रीमहागणपतये नमः ।
नारद उवाच—कुन्देन्दुधवलाकारं नागाभरणभूषितम् ।
वरदाभयहस्तं च बिभ्राणं परशुं मृगम् ॥

End :

एवं ध्यात्वा तु हृत्पद्मे जगतः पितरौ शिवौ ।
जप्त्वा तदात्मकं मन्त्रं तदन्ते बहिरर्चयेत् ॥

Colophon :

इति पार्वतीपरमेश्वरध्यानं सम्पूर्णम् ।

Subject: Praise on Parvati and and Parameśwara.

Remarks : The Ms. is in very good condition.

॥ प्रायश्चित्तस्तुतिः ॥

22353. PRAYAŚCITTA STUTIH

Burnell's Catalogue No. 12116ऋ. Substance—Palm Leaf Size—10 × 1½ inches. Leaves—4. Lines— 7 to a page. Script—Grantha. No. of Granthas—40. Author—Sadananda. Complete.

प्रायश्चित्तस्तुतिः ।

हेरम्बं क्षेत्रपालं च वागीशं वटुकं तथा ।
श्रीगुरुं नाथमानन्दं भैरवं भैरवीप्रियम् ॥
प्रायश्चित्तं परं सर्वं श्रीगुरोः पादुकास्मृतिः ।

End :

एवं श्रीसद्गुरुब्रह्मपादुकामन्त्रचिन्तनात् ।
निष्पापो निर्मलो भूत्वा प्रातराह्निकमाचरेत् ॥

Colophon :

श्रीसदानन्दयोगीन्द्रेण विरचिता श्रीगुरुपादुकास्तुतिः समाप्ता ।

Subject: Praise on Gurupaduka composed by Sri Sadānanda.

Remarks: The Ms. is in fairly good condition.

॥ प्रासादकवचम् ॥

22354. PRĀSĀDA KAVACAM

Nagasami's Collection No. 10 b Substance—Paper. Size—8×6½ inches. Sheets—2 (4-5). Lines—14 to a page. Script—Devanagri. No. of Granthas—25. Author ? Complete.

Beginning:

ओं श्री गणेशाय नमः ।
ओं श्री देव्युवाच — भगवन् देवदेवश सर्वाम्नायप्रपूजित ।
सर्वं मे कथितं देव कवचं न प्रकाशयेत् ॥
प्रासादाख्यस्य मन्त्रस्य कवचं मे प्रकाशय ।
सर्वरक्षाकरं देव यदि स्नेहोऽस्ति मां प्रति ॥

End:

गृहीत्वा दक्षिणां देयं न ग्राह्यं दक्षिणां विना ।
साधकेन महादेवि रहस्यातिरहस्यकम् ॥

Colophon:

इति श्रीभैरवतन्त्रे श्रीदेवीभैरवसंवादे श्रीपराप्रसादसदाशिवकवचं सम्पूर्णमस्तु ।

Subject: Praise on Sadasiva in the type of Kavaca from the Bhiravatantra.

Remarks: The Ms. is in good condition.

॥ पिशाचमोचनम् ॥

22355. PIŚĀCA MŌCANAM

Burnell's Catalogue No. 8569. Substance—Paper. Size—6½×3 inches. Sheets—3. Lines—6 to a page. Script—Devanagari. No. of Granthas—30. Author ? Complete.

Beginning:

श्रीगणेशाय नमः ।

शङ्कुकर्णः — कपर्दिनं त्वां पुरतः परस्तात्
गोप्तारमेकं पुरुषं पुराणम् ।
ऋजामि योगेश्वरमीशितारं
आदित्यमग्निं कपिलादिरूपम् ॥

End :

इत्युक्त्वा भगवान्व्यासः शिष्यैस्सह महामुनिः ।
उपासते स्म युक्तात्मा पूजया वै कपर्दिनम् ॥

Colophon :

इति श्रीकूर्मपुराणे वाराणसीमाहात्म्ये पिशाचमोचनकथनं नाम त्रिंशोऽध्यायः ।

Subject: Praise on Kapardi for Piśāca Mocana from the Kurmapurana.

Remarks: The Ms. is in good condition.

———

PIŚĀCA MOCANAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22356	8937	P	D.Nag.	30	2 (24-25)	Same as 22355

———

॥ पुत्रप्रदस्तोत्रम् ॥

22357. PUTRAPRADA STOTRAM

Burnell's Catalogue No. 8949. Substance – Paper. Size – 8 × 3½ inches. Sheets—2. Lines—6 to a page. Script – Devanagari. No. of Granthas—15. Author ? Complete.

Beginning:

श्रीगणाधिपतये नमः ।
अङ्गिरा उवाच—जय शङ्कर शान्त शशाङ्कमुचे
रुचिरार्थद सर्वग सर्वशुचे ।
शुचिदत्तगृहीतमहोपहृते
हृतभक्तजनोद्धततापतते ॥

End :

अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ।
इत्युक्त्वान्तर्दधे बालः सोऽपि विप्रो गृहं गतः ॥

Colophon:

इति श्रीस्कान्दपुराणे काशीखण्डे दशमोऽध्यायः ।

Subject: Praise on Sankara for Putra from the Skāndapurana.

Remarks: The Ms. is in fairly good condition.

॥ पुलस्त्याष्टकम् ॥

22358. PULASTYĀṢTAKAM

Burnell's Catalogue No. 8484.

Two stotras are referred in this Ms. as D. 22118 and 22323. But this stotra is not available in this Ms.

॥ पूजार्चनविधिस्तोत्रम् ॥

22359. PUJARCANAVIDHI STOTRAM

Burnell's Catalogue No. 8869. Substance—Paper. Size—10½ × 4 inches. Sheets—2. Lines—9 to a page. Script—Devanagari. No. of Granthas—20. Author ? Complete.

Beginning :

श्री गुरुभ्यो नमः ।
हे मुक्तिदायक महेश पिनाकपाणे
शम्भो गिरीश शिव शङ्कर चन्द्रमौले ।
विश्वेश्वरान्तकरिपो पुरसूदनेति
मामर्चयन्त्यनुवदन्ति त एव धन्यः ॥

End :

मल्लिङ्गसम्पूजनसक्तचित्ताः
मद्भक्तपूजार्थमुपात्तवित्ताः ।
मन्नामसङ्कीर्तनमात्रमत्ताः
विशन्ति मल्लोकसयेत्क(मये सु)तृप्ताः ॥

Colophon:

इति श्री ईश्वरपार्वतीसंवादे श्रीपरमेश्वरप्रोक्तं पूजार्चनविधिस्तोत्रं सम्पूर्णम् । इदं पुस्तकं सुन्दरकृष्णेन लिखितं सुपूर्णमस्तु ।

Subject : Praise on Parameswara by Parameswara.

Remarks: The Ms. is in fairly good condition.

॥ पञ्चचामरस्तोत्रम् ॥

22360. PANCACĀMARA STOTRAM

Burnell's Catalogue No. 8850. Substance—Paper. Size—$5\frac{1}{2} \times 3$ inches. Sheets—4. Lines—6 to a page. Script—Devanagari. No. of Granthas —20. Author—Sri Sankara. Complete.

Beginning:

श्री गजाननाय नमः ।
जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥

End:

जयत्यदभ्रविभ्रमद्भुजङ्गमश्वसद्वग-
द्विनिर्गमस्फुरत्करालफालहव्यवाट् ।
धिमिं धिमिं धिमिं (धिमिं) ध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवश्शिवः ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितं पञ्चचामरस्तोत्रम् ।

Subject: Praise on Parameswara in the Pancacamara metre composed by Sri Sankara.

Remarks: The Ms. is in good condition

॥ पञ्चनदीश्वरस्तोत्रम् ॥

22351. PANCANADISWARA STOTRAM

Not noticed by Burnell No. 13581 a. Substance—Paper. Size—8 × 4¼ inches. Sheets—2. Lines—8. to a page. Script—Devanagari. No. of Granthas—15. Author ? Complete.

Beginning:

पञ्चाननातीतसत्यं, पञ्चनदीश्वर पालय नित्यम् ।
मुञ्च न मां तव भृत्यं वञ्चनयानेकगर्हितकृत्यम् ॥

End:

तरुणार्ककोटिप्रकाश करुणासितकण्ठप्रदेश ।
वरुणादिवन्द्य विपाश अरुणाद्रिनायक पञ्चनदीश ॥

Colophon: Nil (तुलजामहाराजस्येदं पुस्तकम्)

Subject: Praise on Pancanadiśwara or Tiruvaiyārappan in the songs.

Remarks: The Ms. is in good condition.

॥ पञ्चमीस्तवराजः ॥

22352. PANCAMI STAVARAJAH

Burnell's Catalogue No. 12214. Substance—PalmLeaf. Size—8×1 inches. Sheets—14. Lines—6 to a page. Script—Telugu. No. of Granthas—625. Author? Complete.

Beginning:

अस्य श्रीपञ्चमीस्तवराजस्तोत्रमहामन्त्रस्य, ईश्वर ऋषिः,
पङ्क्तिच्छन्दः, श्रीमहात्रिपुरसुन्दरी देवता
(ध्यानम्) बालार्कमण्डलाभासां चतुर्हस्तां त्रिलोचनाम् ।
पाशाङ्कुशशरच्चापान् धारयन्तीं शिवां श्रये ॥

End:

इति त्रिपुरसुन्दर्याः स्तवराजमनुत्तमम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ॥

Colophon:

इति स्तवराजं सम्पूर्णम् ।

Subject: Praise on Tripurasundari by God Siva.

Remarks: It is not known that why the Ms. is catalogued in the middle of the Siva stotras. The Ms. is in fairly good condition.

॥ पञ्चवदनस्तोत्रम् ॥

22363. PANCAVADANA STOTRAM

Burnell's Catalogue No. 8892. Substance—Paper. Size—5 × 3½ inches. Sheets—3. Lines—9 to a page. Script—Devanagari. No. of Granthas 15. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।
एतद्बालदिवाकरारुणनिभं बन्धूकपुष्पद्युतिः
श्रीमद्बोधसहस्रपत्रविलसत्कर्णेकनोलोत्पलम् ।
वह्निज्वालशिखाकलापजटिनं भस्माङ्गरागोदयं
नित्यं तत्पुरुषं शिवस्य महिमापूर्वं मुखं पाहि माम् ॥

End:

एतानि पञ्च वदनानि महेश्वरस्य
ये कीर्तयन्ति मनुजाः सततं पठन्ति ।
ते दुःखजातं भवजन्मसञ्चितं
हित्वा पदं याति तथैव शम्भोः ॥

Cholphon: Nil श्रीसाम्बशिवार्पणमस्तु ।

Subject: Praise on Parameswara's heads.

Remarks: The Ms. has scriptorial blunders and is in good condition.

॥ पञ्चवदनस्तोत्रम् ॥

22364. PANCAVADANA STOTRAM

Not noticed by Burnell No. 13568. Substance—Paper. Size—7½ × 4 inches. Sheets—2. Lines—11 to a page. Script—Devanagari. No. of Granthas - 25. Author? Incomplete.

Beginning:

अथ त्रयोदशे मासि स्नात्वा त्रिपथगाम्भसि ।
प्रत्यूष एव वीरेशं यावदायाति स द्विजः ॥

End:

स्वर्गापवर्गसम्पत्तिकारकं नात्र संशयः ।
प्रातरुत्थाय सुस्नातः लिङ्गमध्ये च शाम्भवम् ॥

Colophon: Nil

Subject: Praise on Vaiswanara.

Remarks: The Ms. is different from the previous one with the same title. The Ms. wants an end, so this is an incomplete Ms.

॥ पञ्चवदनस्तोत्रम् ॥

22365. PANCAVADANA STOTRAM

J.L. Collection No. II-150. Substance—Paper. Size—$10\frac{1}{4} \times 3\frac{3}{4}$ inches. Sheets—1. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—15. Author? Complete.

Beginning:

श्रीगणेशाय नमः । श्रीशिवप्रसन्न ।
प्रालेयाचलचन्द्रकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

End:

ईशानस्सर्वविद्यानां ईश्वरस्सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

Colophon :

परमशिवः शरणम् ।

Subject: Praise on Parameswara's five heads named Sadyojata etc.

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in fairly good condition.

॥ पञ्चमुखध्यानम् ॥

22356. PANCAMUKHA DHYANAM

Burnell's Catalogue No. 8350. Substance – Paper. Size— 5 × 3 inches. Sheets 2. Lines—5 to a page. Script— Devanagari. No. of Granthas—15. Author— Sri Sankara. Complete.

Beginning :

प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥

End:

एतानि पञ्चवदनानि महेश्वरस्य
ये कीर्तयन्ति मनुजाः सततं त्रिसन्ध्यम् ।
गच्छन्ति ते शिवपुरीं रुचिरैर्विमानैः
क्रीडन्ति शङ्करगणैः सततं शिवाख्यैः ॥

Colophon :

इति शङ्कराचार्यविरचिते पञ्चमुखध्यानं समाप्तम् ।

Subject: Praise on Parameswara's five heads composed by Sri Sankara.

Remarks: The Ms. is in good condition

PANCAMUKHA DHYANAM

D.No.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
22367	B. 83 0 a	Paper	D.Nag.	15	2	Same as 22366
22368	B. 8350 b	,,	,,	15	2	,,
22369	B. 9686	Palm leaf	Gra.	15	1 (Last)	,,
22370	B.10233	,,	,,	15	2 (Last)	,,
22371	B.12065	,,	,,	15	2 (64-65)	,,
22372	B.12254(च)	,,	,,	15	1 (170th)	,,
22373	N.N.B. 13560	Paper	D.Nag.	15	2	,,
22374	,, 13561	,,	,,	15	2	,,
22375	,, 13562	,,	,,	15	2	,,
22376	,, 13563	,,	,,	15	1	Same as 22363
22377	,, 15140 (Tag.119-I	Palm leaf	Gra.	15	1 (103th)	Same as 22366
22378	J.L. II-60	Paper	D.Nag.	15	2	Same as 22366

॥ पञ्चरत्नस्तवः ॥

22379. PANCARATNA STAVAH

P.A. Collection No. 219 b. Substance—Paper. Size— 9½ × 5½ inches. Sheets—1 (8th). Lines—11 to a page. Script—Devanagari. No. of Granthas—15. Author? Complete.

Beginning:

भूतत्य जात इति वारिरुहासनस्य
जातो बृहन्निति हरेश्च जनिः प्रसिद्धा ।
यस्मादजात इति मन्त्रवरोपदिष्टान्
तं रुद्रमेव जनितश्चकितः प्रपद्ये ॥

End:

आस्ता सूक्ष्मं लिङ्गरूपत्वलिङ्गं
स्याद्ब्रह्मेशानाख्ययैवाल्पमात्रम् ।
इत्येवं नावेदयत्सूत्रकारः
यं ब्रह्माख्यं तं प्रपद्ये महेशम् ॥

Colophon:

पञ्चरत्नस्तवस्समाप्तः ।

Subject: Praise on God Siva in the Jewels of five slokas.

Remarks: The Ms. is in fairly good condition.

॥ पञ्चरत्नस्तोत्रम् ॥

22380. PANCHARATNA STOTRAM

Burnell's Catalogue No. 8937. Substance—Paper. Size—8 × 9½ inches. Sheets—1 (15th). Lines—12 to a page. Script—Devanagari. No. of Granthas—15. Author—Sri Sankara. Complete.

Beginning:

ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ओंकाराय नमो नमः ॥
नागेन्द्रहाराय लसत्त्रिनेत्रभस्माङ्गरागाय महेश्वराय ।
देवाधिदेवाय दिगम्बराय तस्मै नकाराय नमश्शिवाय ॥

End:

पञ्चरत्नमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥

Colophon:

श्री शङ्कराचार्यविरचितं पञ्चरत्नस्तोत्रं सम्पूर्णम् ।

Subject: Praise on God Siva in the Jewles of five slokas composed by Sri Sankara.

Remarks: The Ms. is in good condition.

———

॥ पञ्चरत्नमालिका ॥

22381. PANCHARATNAMĀLIKA

Not noticed by Burnell No. 13688. Substance—Paper. Size – 6 × 3 inches. Sheets – 3. Lines – 6 to a page. Script —Devanagari. No. of Granthas —15. Author—Sri Sankara. Complete.

Beginning:

श्री गणेशाय नमः । पञ्चरत्नमालिका ।
रत्नैः कल्पितमासनं हिमजलैस्स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितैश्चन्दनैः ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे तव मया पूजां गृहाण प्रभो ॥

End:

आराधयामि मणिपूरितमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकैः
नित्यं समाधिकुसुमैर्नपुनर्भवाय ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं पञ्चरत्नमालिकास्तोत्रं
मानसपूजा सम्पूर्णमस्तु ।

Subject: Manasapuja of Parameswara composed by Sri Sankara as Pancaratnamalika.

Remaraks: The Ms. is in very good condition.

— · —

॥ पञ्चरत्नमालिका ॥

22382. PANCARATNA MALIKA

G.K.D. Collection No. 48. Substance—Paper. Size—5×8 inches. Sheets—1. Lines — 19 to a page. Script — Devanagari. No. of Granthas—15. Author—Sri Sankara. Complete.

Beginning:

श्रीगणेशाय नमः ।
प्रातस्स्मरामि परमेश्वरदिव्यमूर्तिं
कर्पूरगौरधवलाङ्गजचर्मचेलाम् ।
गङ्गाधरां कनकपत्रशशाङ्करेखां
कात्यायनीतनुविभूषितवामभागाम् ॥

End:

यः श्लोकपञ्चकमिदं परमेश्वरस्य
भक्त्या पठत्यनुदिनं सुकृती प्रभाते ।

पुत्रांश्चिरायुरनिशं विवधांश्च भोगान्
प्राप्नोति शङ्करनिवासपदं दुरापम् ॥

Colophon :

इति श्रीशङ्कराचार्यविरचितं पञ्चरत्नमालिकास्तोत्रं सम्पूर्णम् ।

Remarks : The Ms. is in good condition. The Ms. contains also Tyāgaraja Kavacam in D. C. No. 22265

॥ साम्बशिवाष्टकम् ॥

23127. SĀMBASIVĀṢTAKAM

Burnell's Catalogue No. 10309 K.

This Ms. is not available now.

॥ हरिहरनामावलीस्तोत्रम् ॥

23128. HARIHARA NĀMĀVALISTŌTRAM

Burnell's Catalogue No. 8958. Substance—Paper. Size—7×4 inches. Sheets—2. Lines—8 to a page. Script—Devanagari. No. Granthas — 18. Author — Sri Sankarācārya. Complete.

Beginning:

श्री गणेशाय नमः ।
शिवेशं रमेशं परेशं गिरीशं
भवं शङ्करं श्रीनिवासं हरिं च ।
महादेवनारायणानन्तनामं
शिवं कृष्णविष्णुं भजेऽहं भजेऽहम् ॥

End:

आनन्दकन्दं परस्वप्रकाशं
चिदानन्दरूपं चिदानन्दभासम् ।
परं ज्योतिनित्यं परंधाम सत्यं
परं ब्रह्म वेदान्तवेद्यं नमस्ते ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितं हरिहरनामावलीस्तोत्रं सम्पूर्णम् ।
श्रीवासुदेवार्पणमस्तु ।

Subject: Praise on Hari and Hara by Sankārācārya

Remarks: The Ms. is in good condition.

HARIHARA NĀMĀVALI STŌTRAM

D. No.	C. No.	Sub.	Script	No. of Grunthas	Sheets	Remarks
23129	J.L. 249/1231	P.	D. Nag.	500	22	The Ms. (12-33) contains only Hariharastotra Vyakhya not Hariharanamavali stotram. This is an incomplete Ms.

॥ हरिहरस्तवः ॥

23130. HARIHARASTAVAḤ

Burnell's Catalogue No. 6697 a. Substance—Paper. Size—10 × 3½ inches. Sheets—4 (72-75) Lines—6 to a page. Script—Devanagari. No. of Granthas—25. Author—Bramha. Complete.

Beginning :

श्री गुरुभ्यो नमः ।
पितामह उवाच—
मन्दरस्य गिरेः पार्श्वे नलिन्यां भवकेशवौ ।
रात्रौ स्वप्नान्तरे ब्रह्मन् मया दृष्टौ हराच्युतौ ।।

End :

राक्षसाश्च पिशाचाश्च भूतानि च विनायकाः ।
भयं तत्र न कुर्वन्ति यत्राऽयं पठ्यते स्तवः ।।

Colophon :

इति श्रीहरिवंशे हरिहरात्मकस्तवः ।

Subject : Praise on Hari and Hara from the Harivamsa.

Remarks : The Ms. is in good condition.

HARIHARASTAVAḤ

D.Nos.	C.Nos.	Sub.	Script.	No.of. Granthas.	Sheets	Remarks.
23131	B. 6698	P.	D.Nag.	25	4 (216-219)	Same as 23130
23132	„ 8937	„	„	25	2 (19–20)	„
23133	„ 8957	„	„	25	6	„
23134	Nagasami 9	-	„	25	2	„

॥ हरिहरस्तोत्रम् ॥

23135. HARIHARA STŌTRAM

Burnell's Catalogue No. 8956. Substance—Paper. Size—6½×4 inches. Sheets—5. Lines—7 to a page. Script—Devanagari. No. of Granthas—25. Author - Dharmaraja Complete.

Beginning:

श्रीगणेशाय नमः ।

गोविन्द माधव मुकुन्द हरे मुरारे
शम्भो शिवेश शशिशेखर शूलपाणे ।
दामोदराच्युत जनार्दन वासुदेव
त्याज्या भटायति सन्ततमामनन्ति ॥

End:

इति शृण्वन्कथां रम्यां शिवशर्मा प्रियेऽनघः ।
प्रहृष्टवक्त्रः पुरतः ददर्शासपरसां पुरि ॥

Colophon:

इति श्रीधर्मराजविरचितं स्तोत्रं सम्पूर्णम् ।

Subject: Praise on Hari and Hara by Dharmaraja.

Remarks: The Ms. has scriptual blunders.

॥ हरिहरस्तोत्रम् ॥

23136. HARIHARASTŌTRAM

T. S. Collection No. 925. Substance — paper. Size— $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Sheets—1. Lines—10 to a page. Script Devanagari. No. of Grānthas—20. Author? Complete.

Beginning:

एकः पपौ भुवनभीकरकालकूटं
अन्यः पपौ स्तनविषं खलु पूतनायाः ।
को वाऽनयोरधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

End:

ग्राहाशितं शिशुमजीवयदेकदासः
गत्वाऽपरः पुरवरं स्वयमन्तकस्य ।
को वाऽनयोरधिक इत्यनुचिन्त्य वृद्धाः
सत्यं वदन्तु तमिमं वयमाश्रयामः ॥

Colophon: Nil

Subject: Praise on Hari and Hara in beautiful slokas.

Remarks: The Ms. is different from the previous one with the same title.

॥ हालास्यनाथस्तोत्रम् ॥

21137. HALĀSYANĀTHA STŌTRAM

Burnell's Catalogue No. 8467. Substance—Paper. Size— $4\frac{1}{2} \times 2\frac{1}{2}$ inches. Sheets—2. Lines—6 to a page. Script—Devanagarī. No. of Granthas—15. Author—Sri Sankara. Complete.

Beginning :

सुवर्णपद्मिनीतटान्तदिव्यहर्म्यवासिने
सुपर्णवाहनप्रियाय सूर्यकोटितेजसे ।
अपर्णया विहारिणे फणाधरेन्द्रधारिणे
सदा नमश्शिवाय ते सदाशिवाय शम्भवे ।।

End :

सदाशिवाष्टकमिदं यः पठेत्प्रयतो नरः ।
भुक्त्वा तु सकलान्भोगानन्ते शिवपदं व्रजेत् ।।

Colophon:

इति श्रीमच्छङ्कराचार्यविरचितं शिवाष्टकं सम्पूर्णम् ।

Subject : Praise on Sadasiva by Sri Sankāracārya.

Remarks : The Ms. contains Sadāśivāṣṭakam not Halāsyanātha Stotram.

।। हालास्यनाथस्तोत्रम् ।।

23138. HALĀSYANĀTHA STŌTRAM

Burnell's Catalogue No. 8457 a. Substance—Paper. Size—$4\frac{1}{2} \times 2\frac{1}{2}$ inches. Sheets—2. Lines—6 to a page. Script—Devanagari. No. of Granthas—15. Author? Complete.

Beginning:

मधुरिपुविधिशक्रमुख्यदेवै-
रपि नियमार्चितपादपङ्कजाय ।
कनकगिरिशरासनाय तुभ्यं
रजतसभापतये नमश्शिवाय ।।

End :

अकृशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितम्बे ।
अरुणाधरमाविरस्तु चित्ते करुणाशालि कपालिभागधेयम् ।।

Colophon : Nil

Subject : Praise on Rajata Sabhapati (Halasyanatha).

Remarks : The Ms. is in good condition.

।। हालास्यनाथस्तोत्रम् ।।

23139. HALĀSYANĀTHA STŌTRAM

Not noticed by Burnell No. 12691. Substance—Paper. Size—4×10 inches. Sheets—1. Lines—22 to a page. Script Devanagari. No. of Granthas—15. Author—Devēndra. Complete.

Beginning:

कल्याणशैलपरिकल्पितकार्मुकाय
मौर्वीकृताखिलमहोरगनायकाय ।
पृथ्वीरथाय कमलापतिसायकाय
हालास्यमध्यनिलयाय नमश्शिवाय ।।

End:

हालाहलालंकृतकन्धराय
मीनेक्षणायाः पतये नमस्ते ।
नमो नमस्सुन्दरताण्डवाय
हालास्यमध्यनिलयाय नमश्शिवाय ।।

Colophon:

इति देवेन्द्रविरचितं हालास्यनाथाष्टकं सम्पूर्णम् ।

Subject: Praise on Halāsyanātha from Halāsyamāhātmya

Remarks: The Ms. is different from the previous one with the same title.

HALĀSYESA STOTRAM

D.Nos.	Collection Nos.	Sub. Script	No. of Granthas	Sheets	Remarks.
23140 (Tag. 44 II)		PL.	Gran.		This Ms. is missing.

॥ अग्निस्तोत्रम् ॥

23141. AGNI STOTRAM

Burnell's Catalogue No. 8817. Substance—Paper. Size—10×4 inches. Sheets—1. Lines—8 to a page. Script—Devanagari No. of Granthas—10. Author — Vyāsa (Sahadēva) Complete.

Beginning:

श्रीसहदेव उवाच–
त्वदर्थोऽयं समारम्भः कृष्णवर्त्मन्नमोऽस्तु ते ।
मुखं त्वमसि देवानां यज्ञस्त्वमसि पावकः ॥

End:

एवं स्तुतोऽसि भगवान् प्रीतेन शुचिना मया ।
तुष्टिं पुष्टिं ऋतं चैव प्रीतिं चाग्ने प्रयच्छ मे ॥

Colophon:

भारतोक्तम् ।

Subject: Praise on Agni composed by Sahadeva in Mahabharata

Remarks: The Ms. is in good condition

AGNI STOTRAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
23142	B. 8818	Paper	D.Nag.	0	1	Same as 23141

॥ अग्निस्तोत्रम् ॥

23143. AGNI STŌTRAM

Burnell's Catalogue No. 8819. Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—4. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—40. Author ? Complete.

Beginning:

श्रीगणेशाय नमः । वैशम्पायन उवाच –
पराजयं तु देवानां दृष्ट्वाग्निस्त्रिदशोत्तमः ।
चकार बुद्धिं दैत्यानां वधे ब्रह्मर्षिसंस्तुतः ॥

End:

पिङ्गाक्ष लोहितग्रीव कृष्णवर्त्मन्हुताशन ।
नमस्ते हव्यवाडेको नमस्ते वाहशक्तिप ॥

Colophon:

इति श्रीहरिवंशे वामनप्रादुर्भावे अग्नियुद्धं नाम पञ्चदशाधिक-त्रिशततमोऽध्यायः । श्री साम्बशिवार्पणमस्तु ।

Subject: Praise on Agni in Harivamsa.

Remarks: The Ms. is different from the previous one with the same title. The Ms. is in good condition.

॥ अग्निस्तोत्रम् ॥

23144. AGNI STOTRAM

Burnell Catalogue No. 8937. Substance—Paper. Size—8 × 10 inches Sheets – 2 (177-178). Lines – 19 to a page. Script – Devanagari. No. of Granthas—25. Author—Vyasa (Mandapāla) Complete.

Beginning :

ततोऽग्निं खाण्वं दग्धुं आयान्तं दृष्टवानृषिः ।
मन्दपालस्त्वरंस्तस्मिन्वने लपितया सह ॥

End.

तथेति तं प्रतिश्रुत्य भगवान्हव्यवाहनः ।
खण्डवे तेन कालेन प्रजज्वाल दिधक्षया ॥

Colophon :

इति महाभारते आदिपर्वणि खाण्डवदाहे मन्दपालकृतं
अग्निस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Agni composed by Mandapala in Mahabharata.

Remarks : The Ms. is different from the previous one with the same title.

॥ अग्निस्तोत्रम् ॥

23145. AGNI STOTRAM

Burnell's Catalogue No. 8937. Substance—Paper. Size—8 × 10 inches. Sheets 1 (178th) Lines—19 to a page. Script Devanagari. No. of Granthas—30. Author—Vyasa (Sārngaka) Complete.

Beginning :

वैशम्पायन उवाच –

एवं सम्भाष्यतेऽन्योन्यं मन्दपालस्य पुत्रकाः ।

तुष्टुवुः प्रयता भूत्वा यथाऽग्नि शृणु पार्थिव ॥

जरितारिरुवाच —

आत्माऽसि वायोर्ज्वलन शरीरमसि वीरुदाम् ।

योनिरापश्च ते शुक्रं योनिस्त्वमसि चाम्भसः ॥

End:

तथा तत्कृतवानग्निः अभ्यनुज्ञाय शार्ङ्गकान् ।

ददाह खाण्डवं दावं समिद्धो जनमेजय ॥

Colophon :

इति श्रीमहाभारते आदिपर्वणि खाण्डवदाहे शार्ङ्गककृतं

अग्निस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Agni composed by sons Mandapala in Mahābhārata.

Remarks : The Ms. is diffentent from the privious one with the same title.

॥ अभीतिस्तवः ॥

23146. ABHĪTI STAVAḤ

Not noticed by Burnell No. 15071 (Tag. No. 48). Substance–Palm Leaf. Size 16 × 1½ inches. Leaves—2 Lines–10 to a page. Script—Grantha. No. of Granthas—50. Author—Sri Vēdānta Dēsika Complete.

Beginning:

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
अभीतिरिह यज्जुषां यदवधीरितानां भयं
भयाऽभयविधायिनो जगति यन्निदेशस्थिताः ।
तदेतदतिलङ्घितद्रुहिणशर्वशक्रादिकाः
रमासखमधीमहे किमपि रङ्गधुर्यम्महः ॥

End:

प्रबुद्धगुरुवीक्षणप्रथितवेङ्कटेशोद्भवां
इमामभयसिद्धये पठत रङ्गभर्तुस्स्तुतिम् ।
भयं त्यजत भद्रमित्यभिदधत्स वः केशवः
स्वयं घनघृणानिधिः गुणगणेन गोपायति ॥

Colophon:

कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अभीतिस्तवः सम्पूर्णः ।

Subject: Praise on Viṣnu composed by Dēśika

Remarks: The Ms. is in good condition.

ABHITISTAVAḤ

D.Nos.	C.Nos.	Sub.	Script	No. of Grantha	Sheets	Remarks
23147	N.N.B. 15097 (Tag. No. 74)	P. L.	Grantha	50	3 (20 to 22)	Same as 23146

॥ अयुतनामावलिः ॥

23148. AYUTA NĀMĀVALI

Not noticed by Burnell No. 15189a (Tag. 171). Substance—Palm leaf. Size—19 × 1¼ inches. Leaves—168. Lines—5 to a page. Script—Telugu. No. of Granthas—3000. Author? Complete.

Beginning:

अङ्गपद्म
अङ्गनचतुर
अङ्क्यनादपरविनिधि
अङ्कितिलक
अङ्कुशयुतपद

End:

क्षमितसागर
क्षौद्रसमष्टिमधु
क्षौमनिवासनाथ
क्षौमाम्बरधरदुकूल

Colophon:

मुब्बय्यब्राह्मिनपुस्तकम् ।
सन्तानगोपालस्वामिने नमः ।
अयुतनामस्तवं समाप्तम् ।

Subject: 10000 Sacred names of Vishnu

Remarks: The Ms. is in good condition.

॥ अवधूतभुजङ्गस्तोत्रम् ॥

23149. AVADHŪTA BHUJANGA STTŌRAM

Not noticed by Burnell No. 13550. Substance—Paper. Size—5½×3 inches. Sheets—4 (7-10). Lines—6 to a page. Script—Devanagari. No. of Granthas—20. Author? Complete.

Beginning:

न योगी न भोगी न वा मोक्षकारी
न वीरो न धीरो न वा साधकेन्द्रः ।
न शैवो न शाक्तो न च वैष्णवो वाऽ-
वधूतो चिदानन्दरूपोऽहमात्मा ॥

End:

भुजङ्गप्रयातं पठेद्यस्तु भक्त्या
समाधाय चित्तं भवेद्योगसिद्धम् ।
... ...
नगेन्द्रकन्यावृषकेतनाभ्यां
नमोनमः शङ्करपार्वतीभ्याम्

Colophon:

इति श्रीईश्वरपार्वतीसंवादे अवधूतलक्षणं नामस्तोत्रं सम्पूर्णम् ।

(in page 9A)

Subject: Praise on Avadhuta sage.

Remarks: The Ms. is in good condition.

॥ अश्वत्थस्तोत्रम् ॥

23150. ASWATHA STOTRAM

J.L. Collection No. 40/503 Substance—paper. Size—$6\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—6. Lines 7 to a page. Script – Devanagari. No. of Granthas—50. Author? Complete.

Beginning:

श्रीगणेशाय नमः ।
अथ ध्यानं प्रवक्ष्यामि सर्वाभीष्टफलप्रदम् ।
पुत्रकामस्तु देवर्षे श्वेतवर्तं सुशोभितम् ॥

End:

दृष्ट्वा तु हरते पापं स्पृष्ट्वा लक्ष्मीश्च वर्धते ।
अश्वत्थे वो निषदनं ... ...
अश्वत्थसेवातिलपात्रदानं ० कीर्तनं च ।
गङ्का गङ्केति यो ब्रूयात् योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अश्वत्थस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Asvatha tree in Bramhanda purana.

Remarks: The Ms. is in good condition.

॥ अष्टोत्तरशतस्थानस्तोत्रम् ॥

23151. AṢṬŌTTARAṢATA SṬHĀNA STŌTRAM

Not noticed by Burnell No. 15123 (Tag 101). Substance—Palm Leaf. Size—$9 \times 1\frac{1}{4}$ inches. Leaves–2. Lines—8. to a page. Script—Telugu. No. Granthas—30. Author? Complete.

Beginning:

शुक्लाम्बरधरं विष्णुं ... ... शान्तये ।।
अष्टोत्तरशतस्थानेष्वष्टोद्भूतजगत्पतिम् ।
नमामि जगतामीशं नारायणमनन्वयम् ।।

End:

श्रीमुष्णं वेङ्कटाद्रिञ्च सालग्रामं च ..... ।
श्वेताद्रौ पुष्करं चैव नरनारायणाश्रयम् ।।
अष्टौ ये मूर्तयस्सन्ति स्वयं व्यक्तमहीतले ।

Colophon:

इति अष्टोत्तरशतस्थानस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Sacred Places of Viṣnu in Bharatavarṣa

Remarks: The Ms. is in decaying condition.

॥ आनन्दतीर्थाष्टकम् ॥

23152. ĀNANDA TĪRTHĀṢTAKAM

Burnell's Catalogue No. 8523. Substance—Paper. Size—10×4 inches. Sheets—1. Lines—13 to a page. Script—Devanagari. No. of Granthas—20. Author? Complete.

Beginning:

मध्वाष्टकम् ।
अज्ञाननाशाय सतां जनानां कृतावताराय वसुन्धरायाम् ।
मध्वास्तिधानाय महामहिम्ने हृताघसङ्घाय नमोऽनिलाय ।।

End:

परमपुरुष श्रीचरणसरोरुहं मधुकररूपमानसमुदितम् ।
गुरुकुलतिलक श्रीमदानन्दतीर्थयोगिवरं सततमहं वन्दे ।।

Colophon: Nil

Subject: Praise on Ānanda Tirtha (Mādhva).

Remarks: The Ms. was Catalogued in D. 24387. The Ms. discribes Lakshmiyaṣtakam also.

॥ शक्रस्तुतिः ॥

23153. SAKRA STUTIḤ

Burnell's Catalogue No. 8798. Substance—Paper. Size—8×4½ inches. Sheets—2. Lines—9 to a page. Script—Devanagari. No. Granthas — 20. Author — Kadru Complete.

Beginning:

श्री गणेशाय नमः । सूत उवाच—
ततः कामगमः पक्षी कामवीर्यो महाबलः ।
मातुरन्तिकमागच्छत्परं पारं महोदधेः ॥
यत्र सा विनता तस्मिन्पणितेन पराजिता ।

End:

त्वं विप्रैः सततमिहेज्यसे फलार्थं
वेदाङ्गेष्वतुलबलौघ गीयसे ।
त्वद्धेतोर्यजनपरायणाद्द्विजेन्द्राः
वेदाङ्गान्यभिगमयन्ति सर्वरत्नैः ॥

Colophon:

इत्यादिपर्वणि कद्रूकृतशक्रस्तुतिर्नामाध्यायस्समाप्तः ।

Subject: Praise on Indra composed by Kadru in Bharata.

Remarks: The Ms. is in good condition.

॥ क्षमाषोडशी ॥

23154. KṢAMĀṢŌDAṢI

Not noticed by Burnell No. 15071 (Tag. 48) Substance—Paper. Size—17½ × 1½ inches. Leaves—2 (39-40) Lines—10 to a page. Script—Grantha. No. of Granthas—30. Author—Sri Vēdacārya. Complete.

Beginning:

श्रीमते नारायणाय नमः ।
यश्चक्रे रङ्गिणि स्तोत्रं क्षमाषोडशिनामकम् ।
वेदव्यासस्य तनयः वेदाचार्यमहं भजे ॥

End:

अल्पं चेदनवेक्षणीयसरणावारोप्यतां मत्कृतं
किञ्चिद्भूरि भवेदिदं यदि गुरून्संप्रेक्ष्य मेत्यज्यताम् ।
यद्वानन्तमनन्तवैभवजुषो रङ्गक्षमावल्लभ
त्वत्क्षान्त्याः खलु लक्ष्यतां अनुगुणामानीयतां तत्त्वया ॥

Colophon: हरिः ओं ।

Subject: Praise on KṢama of Viṣnu composed by Vedacarya

Remarks: The Ms. is in good condition.

KṢAMA ṢODAṢI

D.Nos.	C.Nos. N.N.B.	Sub.	Script	No. of Granthas	Sheets	Remarks
23155	15097 (Tag. 74)	PL.	Gran.	30	2	Same as 23154

॥ क्षमाषोडशीव्याख्या ॥

23156. KṢHAMĀṢŌDASI VYĀKHYĀ

Not noticed by Burnell No. 15067 (Tag. 44) Substance—Palm Leaf. Size—16 × 2 inches. Leaves—12. Lines—9 to a page. Script—Telugu No. of Granthas—1500. Author? Complete.

Beginning:

शुभमस्तु । क्षमाषोडशीव्याख्यानम् ।
वन्दे गुरुदयाधीशं वात्स्यं वरगुणाकरम् ।
यत्युक्तिर्यतिराजोक्तिकेकिन्याः कालकालिका ॥
श्रुतप्रकाशिकाचार्यसुतेन रचिता स्तुतिः ।
श्रीरङ्केशक्षमालंघ्या गम्भीरा वा विविच्यते ॥

End:

स्वकृतप्रबन्धस्य कर्तृवैगुण्यं परिहरति—सन्त्यक्तसर्वविहित-
क्रिययार्थकामश्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ।
अत्यन्तनास्तिकमनात्मगुणोपपद्यं यां रङ्गराज ... ...

Colophon: Nil

Subject: Commentary of Kṣhamāṣōdasi of Vedanta Desika

Remarks: The Ms. is in decaying condition.

॥ काञ्चीस्तवः ॥

23157. KĀNCĪ STAVAḤ

Not noticed by Burnell No. 15071 j (Tag. 48) Substance—Palm Leaf. Size—17½ × 1¾ inches. Leaves—1 (21) Lines—10 to a page. Script—Grantha. No. of Granthas — 15. Author—Sri Desika. Complete.

Beginning:

श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम् ।
वरदाङ्घ्रिसदासंगरसायनपरायणम् ॥

End:

देवराज दयासिन्धो देवदेव जगत्पते ।
त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः ॥
कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम् ॥

Colophon:

श्रीमान्वेङ्कटनाथार्यः ... ... सदाहृदि ।

Subject: Praise on Kancimuni composed by Vedanta Desika

Remarks: The Ms. is in good condition.

KĀNCI STAVAḤ

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks.
23158	N.N.B. 15097 Tag. 74	P. L.	Grantha	15	1	Same as 23157

॥ कावेरीस्तुतिः ॥

23159. KĀVERI STUTIḤ

Not noticed by Burnell No. 12917. Substance—paper. Size—9½×4 inches. Sheets—2. Lines—8 to a page. Script—Devanagari. No. of Granthas—35. Author? Incomplete.

Beginning:

श्री वेङ्कटेशाय नमः ।
सह्याचलसमुद्भूते सज्जनसम्मोहसंसेव्यमाने सुशिष्यसमाज-
समावृतकुम्भसम्भवसकलसरित्सलिलसम्पूरितकलशमुखा-
त्समीरसहायेन रसायां संसरमाणे ।

End:

सनकादिसिद्धगणैः भरद्वाजादिऋषिगणैः प्रह्लादाद्यसुरगणैः
सर्वैर्जनैश्चावगाह्यमाने त्रिलोकपावनि कावेरि भुवि विजयसे
विजयसे ।

Colophon: Nil.

Subject: Praise on Kaveri.

Remarks: The Ms. catalogued in D. 19571.

॥ कुण्डोदरस्तोत्रम् ॥

23160. KUNḌŌDARA STOTRAM

Not Noticed by Burnell No. 15096 (Tag 73) Substance—Paper. Size—12×1 inches. Leaves—2. Lines—6 to a page. Script—Telugu. No. Granthas—25. Author—Kundodara. Complete.

Beginning:

कुण्डोदरः—
शैलाधीशसुतासहाय सकलाम्नायान्तवेद्य प्रभो
शूलास्त्राग्रविदारितान्धकसुरारातीन्द्रवक्षस्थल ।
कालातीतक ... ... ते सन्ततं
हालास्येशकृपाकटाक्षलहरी मामापदामास्पदम् ॥

End:

एवं स्तोत्रेण सन्तोष्य सभूतो भूतनायकम् ।
शिरस्यञ्जलिमाधाय शिवस्य चरणाब्जयोः ॥
निधाय विमले नेत्रे तूष्णीं तिष्ठति भक्तितः ।

Colophon: Nil

Subject: Praise on Sundarēśwara by Kundodara in Meenakṣhi Kalyana.

Remarks: The Ms. is in decaying condition.

॥ केशिराजस्तोत्रम् ॥

23161. KEŚIRĀJA STŌTRAM

Burnell's Catalogue No. 8889. Substance—Paper. Size—5×3 inches. Sheets—4. Lines—7 to a page. Script—Devanagari. No. of Granthas · 20. Author—Dāsānudāsa. Complete.

Beginning:

श्री केशिराजाय ।
नित्यं नित्यः शुद्धः परमविमलं पूर्णपरम् ।
परातीतं पारं अव्ययसघनं निर्मलघनम् ॥
सदोदाता नायं निखिल अखिलोपाधिरहितं
गतं गम्यागम्योविहीन ये अगम्योयती सदा ।

End:

ईदं केशीराजं मम वच्यनवाच्यावदनियं
अवाच्यो वा वाच्या पठती येतीयेः सप्तकमिदम् ।
पठेस्तस्या मुक्ती भवती यतो सायोज्यपदवीं
स्वयं ब्रह्मोप्राप्ती आखिलनीखिलामेव भवती ॥

Colophon :

ईती श्रीदासानुदासवीरचिते केसीराजसप्तकस्तोत्रं सम्पूर्णमस्तु । केसीराजार्पणमस्तु ।

Subject : Praise on Kēsirāja.

Remarks : The Ms. has scriptual blenders.

॥ खड्गमाहात्म्यस्तोत्रम् ॥

23162. KHAḌGA MĀHĀTMYA STŌTRAM

Burnell's Catalogue No. 8774. Substance—Paper. Size—$5\frac{1}{2} \times 2\frac{3}{4}$ inches. Sheets—2. Lines—6 to a page. Script—Devanagari. No. of Granthas—10. Author ? Complete

Beginning :

श्रीगणेशाय नमः ।

शृणु राजन्प्रवक्ष्यामि खड्गमाहात्म्यमुत्तमम् ।

यद्ज्ञात्वा शत्रुसैन्येषु जायते निर्भयः पुमान् ॥

End :

तत्त्वज्ञानं समासाद्य सच्चिदानन्दमूर्तयः ।

नीरजस्कास्सदा तुष्टा ब्रह्म यान्ति सनातनम् ॥

Colophon :

इति खड्गमाहात्म्यं सम्पूर्णमस्तु । श्रीरामचन्द्रार्पणमस्तु ।

Subject : Praise on Khaḍga (Sword).

Remarks : The Ms. is in good condition.

॥ गुर्वष्टकम् ॥

23163. GURVAṢTAKAM

Burnell's Catalogue No. 8505. Substance – Paper. Size — 5¼ × 3 inches. Sheets – 3. Lines—7 to a page. Script — Devanagari. No. Granthas — 15. Author ? Complete.

Beginning :

श्रीगुरुगणाधिपशारदाभ्यो नमः ।
आदौ यतः प्रचलिता गुरुपङ्क्तिरेषा
नाथावली समयमार्गमुखोपदिष्टा ।
तं त्वादिनाथमनुकंपितवीरनाथं
नाथं नमामि नमदार्तिलताकुठारम् ॥

End:

निर्माणमानन्दगुरुं मुरारिं निरन्तराराधननिर्विकारम् ।
ज्ञानाटवीमस्करिणीस्वरूपं विलोकनेनैव विबोधमीडे ॥

Colophon : Nil

Subject : Praise on Guru in eight slokas.

Remarks : The Ms. is in good condition.

॥ गुर्वष्टकम् ॥

23164. GURUVAṢTAKAM

Burnell's Catalogue No. 8551. Substance – Paper. Size — 8 × 3½ inches. Sheets – 1. Lines – 9 to a page. Script Devanagari. No. of Granthas – 10. Author – Gnaëswara. Complete.

Beginning:

श्रीगणेशाय नमः ।
श्रीपादवल्लभमिममादिदेवं महागुरुम् ।
प्रणम्य पादुकां तस्य स्वानन्दसुखकारकम् ॥
शङ्करं करुणापूर्णं शिष्याशां वरदायकम् ।
यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ॥

End:

यत्पादमब्जसद्भावं ध्यायतं पूजितं यदि ।
तस्योपदेशमात्रेण लब्ध्वा मोक्षगुरोः पदम् ॥

Colophon:

ज्ञानेश्वराष्टक

Subject: Praise on Guru Gnāēewara

Remarks: The Ms. is different from the previous one with the same title.

॥ गुर्वष्टकम् ॥

23165. GURVAṢTAKAM

Burnell's Catalogue No. 8921. **Substance**—paper. **Size**—$7\frac{1}{2} \times 3\frac{1}{2}$ inches. **Sheets**—2. **Lines**—7 to a page. **Script**—Devanagari **No. of Granthas**—15. **Author?** Complete.

Beginning:

श्रीरामाय नमः ।
आनन्दकन्द अलोल अचवत ब्रह्मवेद सनातनम् ।
सकलमुनिजनचरणबन्दितं, श्रीगुरुजीचरण प्रणाम्यहम् ॥

End:

श्री गुरु अष्टक पठत निसदिन प्रापते फलदायकम् ।
श्रीअग्रस्वामि चरणवन्दितं श्रीगुरुचरणप्रणाम्यहम् ॥

Colophon:

इति श्रीगुरु अष्टकं सम्पूर्णम् ॥

Subject: Praise on Guru in eight slokas in the Hindi?

Remarks: The Ms. is different from the previous one with the same title.

GURVAṢTAKAM

D.Nos.	Collection No.	Sub	Script	No. of Granthas	Sheets	Remarks.
23166	13720 e	Paper	D.Nag	15	2 (6-7)	Same as 23165

N.N.B.

॥ गुर्वष्टकम् ॥

23167. GURVAṢTAKAM

Not noticed by Burnell No. 12755. Substance—Paper. Size—7 x 4 inches. Sheets—1. Line—11 to a page. Script—Devanagari. No. of Granthas—15. Author—Sri Śankārācārya. Complete.

Beginning:

श्री गणेशाय नमः ।

कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बान्धवास्सर्वमेतं द्विजातम् ।

गुरोरङ्घ्रिपद्मे मनश्चेन्न दत्तं ततः किं ततः किं ततः किम् ॥

End:

गुरोरष्टकं यः पठेत्पुण्यदं हि यतिर्भूपतिर्ब्रह्मचारी च गेहे ।

लभेद्वांछितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्यमनो यः सज्ञा ॥

Colophon :

इति श्रीशङ्कराचार्यविरचितं गुर्वष्टकस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Guru in eight slokas composed by Sri Sankara.

Remarks : The Ms. has scriptual blenders. The Ms. contains Dhruvastuti also.

॥ गुरुगीतास्तोत्रम् ॥

23168. GURUGĪTĀ STOTRAM

Not noticed by Burnell No. 12526. Substance—paper. Size—9½×4 inches. Sheets—19. Lines—7 to a page. Script—Devanagari. No. of Granthas – 200. Author ? Complete.

Beginning :

श्री गणेशाय नमः ।
ओं नमस्सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥

End :

इत्येवं कवचं परात्परतरं दिव्यौघसिद्धौघवान्
मानौधाः क्रमशस्तथा परगुरुः शिष्टागुरोस्संज्ञितम् ।
भक्त्या देशिकमन्त्ररूपपठितं चित्तानुगं श्रीगुरुं
ध्यात्वा श्रीचरणं कवित्वमपरामन्ते च मुक्तिं व्रजेत् ॥

Colophon :

इति श्रीरुद्रयामले ईश्वरपार्वतीसंवादे गुरुकवचं सम्पूर्णमस्तु ।
श्रीशङ्करार्पणमस्तु ।

Subject : Praise on Sri Guru in Rudrayāmala.

Remarks: The Ms. contains Gurustotram, Gurumahatmyam and Gurukavacam also. So this was Catalogued in D 19210 The Ms. has scriptual blunders.

— — —

॥ गुरुदशकम् ॥

23169. GURUDASAKAM

संज्ञ. No Less

This Ms. is not available.

॥ गुरुनमस्कारश्लोकाः ॥

23170. GURU NAMASKĀRA SLŌKĀḤ

Not noticed by Burnell No. 12046 ई Substance—Paper. Size—15×1¼ inches. Sheets—2. Lines—5 to a page. Script—Telugu No. of Granthas—20. Author ? Complete.

Beginning:

स्वस्ति श्रीगुरुभ्यो नमः ।
पार्वत्युवाच—यत्कटाक्षमहामेरुं अहमाश्रित्य नित्यशः ।
सुभगाऽस्मि कृतार्थास्मि गुरुनाथं तमाश्रये ॥

End:

यन्त्रमूलं गुरोर्वाक्यं पूजामूलं गुरोः पदम् ।
ध्यानमूलं गुरोर्मुर्त्तिः मुक्तिमूलं गुरोः कृपा ॥

Colophon:

दत्तात्रेयाय नमः ।

Subject: Praise on Guru.

Remarks: The Ms. is in decaying condition.

॥ गुरुपटलम् ॥

23171. GURU PATALAM

Burnell's Catalogue Collection No. 8502. Substance—Paper. Size – $4\frac{1}{2} \times 3$ inches. Sheets —9. Lines—8 to a page. Script – Devanagari. No. of Granthas—45. Author ? Complete.

Beginning:

श्रीगणेश्वराय नमः । श्रीदेवदत्ताय नमः ।

वसिष्ठ उवाच—नमस्तुभ्यं गङ्गाधरं पत्नीयति खगेश्वरम् ।
नीलकण्ठः कौवेरेशो श्रीधरश्चाब्जकेश्वरः ॥

End:

श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दाय ते तनुः ॥

Colophon:

इति श्रीरुद्रयामले पार्वतीईश्वरसंवादे परमहंसस्य गुरुपटलः सम्पूर्णः । शुभं भवेदिति ।

Subject: Praise on Guru in Rudrayamala.

Remarks: The Ms. has scriptual blunders.

॥ गुरुपरस्तोत्रम् ॥

23172. GURUPARA STOTRAM

Burnell's Catalogue No. 12209 आ. Substance—Palm Leaf. Size—14 × 1 Inches. Leaves—2. Lines—5 to a page. Script—Telugu. No. of Granthas—20. Author ? Complete.

Beginning :

गुरुपरम् ।
निषिक्तमणिपादुकं नियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रिकम् ।
परामृतसरोवरोदितसरोजरोचिष्णु त-
द्भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥

End :

विमलानन्दयोगीशं गन्धानन्दं ततःपरम् ।
चिद्रूपानन्दयोगीशं दत्तात्रेयगुरुं भजे ॥
पूर्णानन्दयोगीशं सद्गुरुं तन्नमाम्यहम् ।
एतान् गुरून् सहस्रारे पङ्कजे परिभावयेत् ॥

Colophon : राम ।

Subject : Praise on Guru.

Remarks : The Ms. is in fairly good condition.

23173. GURU PARAMPARA STŌTRAM

J. L. Collection No. 36/449.
This Ms. is not available.

॥ गुरुपादुकास्तोत्रम् ॥

23174. GURU PĀDUKĀ STOTRAM

Burnell's Catalogue No. 8496. Substance – paper. Size— $4\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—7. Lines—6 to a page. Script— Devanagari. No. of Granthas—35. Author ? Complete.

Beginning:

श्रीगुरुभ्यो नमः ।
हेरम्बं क्षेत्रपालं च वागीशं वटुकं तथा ।
सद्गुरुं नाथमानन्दं भैरवं भैरवप्रियम् ॥

End:

पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः ।
भोगमोक्षार्थसिद्धिश्च षड्भिरागमपारगैः ॥

Colophon:

इति श्रीरुद्रयामलोड्डामकेश्वरतन्त्रे उमामहेश्वरसंवादे
गुरूपादुकास्तोत्रं सम्पूर्णम् ।

Subject: Praise on Gurupaduka in Rudrayamala.

Remarks: The Ms. is in good condition.

॥ गुरुपादुकास्तोत्रम् ॥

23175. GURU PĀDUKĀ STŌTRAM

Not noticed by Burnell No. 13557. Substance–Paper. Size–7×4 inches. Sheets–3. Lines–10 to a page. Script—Devanāgari. No. of Granthas—35. Author—Sankarānanda-natha. Complete.

Beginning: Same as 23174

End:

'पशुपतिपदभाजिनां जनानां
भवति पापकलङ्कसंगशङ्का ।
दिनकररथवाजिनां कथं तत्
तिमिरतरङ्गतिरस्क्रियाप्रसङ्गः ॥

Colophon :

इति प्रायश्चित्तखण्डे गुरुपादुकास्तोत्रं सम्पूर्णम् ।
शङ्करानन्दनाथविरचिते ।

Subject : Praise on Gurupaduka.

Remarks : The Ms. is same as 23174 with slight change.

GURUPĀDUKĀ STŌTRAM

D.Nos.	C.Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
N.N.B.						
23176	12757	Paper	D.Nag.	35	4	Same as 23174

॥ गुरुपादुकास्तोत्रम् ॥

23177. GURUPĀDUKĀ STŌTRAM

Not noticed by Burnell No. 12759. Substance—Paper. Size—5×2½ inches. Sheets—6. Lines—4 to a page. Script—Devanagari. No. of Granthas—10. Author ? Complete.

Beginning :

यस्य देवे परा भक्तिः यथा देवस्तथा गुरुः ।
तस्यैतेऽकथिताह्यर्थाः प्रकाशन्ते महात्मनः ॥

End:

किं मन्त्रं बहुनोक्तेन शश्वत्कोटिशतैरपि ।
दुर्लभा चित्तविश्रान्तिः विना गुरुकृपां पराम् ॥

Colophon :

इति श्रीगुरुपादुकास्तोत्रं सम्पूर्णमस्तु ।

Subject : Praise on Gurupaduka.

Remarks : The Ms. is different from the previous one with the same title. The Ms. has scriptual bunders.

॥ गुरुपादुकापञ्चकम् ॥

23178. GURU PĀDUKĀ PANCAKAM

Burnell's Catalogue No. 8497. Substance—Paper. Size—5×3 inches. Sheets—3. Lines—6 to a page. Script—Devanagari. No. of Granthas—10. Author ? Incomplete.

Beginning :

श्रीगुरुनाथाय नमः ।
द्विशक्तीमणिपादुकां नियमतांत्मकोलाहलें
स्फुरत्किशलयारुणं नखंसमीमीशश्चन्द्रीकाम् ।
परामृतसरोवरोजीतसरोचिष्णुतां
भजामी सीरसीस्थितं गुरुपदारविंदद्दयम् ॥

(See D. 23172)

End:

पादुकापञ्चकस्तोत्रं पञ्चवगत्रं मुखोद्गितम् ॥
पंचैवाहः क्रनः प्रोक्त प्रपञ्चदुर्लभस्मती ॥

Colophon :

ईति श्रीरुद्रयामके गुरुपादुकापञ्चकस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Gurupaduka in five slokas.

Remarks : The Ms. has scriptual blunders.

GURU PĀDUKĀ PANCAKAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
	N.N.B.					
23179	12758	Paper.	D. Nag.	10	3	Same as 23178
23180	„ 12763	„	„	35	6	Same as 23174

॥ गुरुपरम्परास्तोत्रम् ॥

23181. GURU PARAMPARĀ STŌTRAM

Not noticed by Burnell No. 12756. Substance—Paper.
Size—10×4 inches. Sheets—3. Lines—5 to a page.
Script—Devanagari. No. of Granthas—15. Author ?
Complete.

Beginning:

श्रीगुरुभ्यो नमः ।
श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं स्यूतिक्रमं शाम्भवम् ।
चिराद्दृष्टचतुष्टषष्टनवकं चीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

End:

रङ्गनाथपरं ब्रह्म पुर्णानन्दस्ततः परम् ।
कृष्णानन्दः परञ्ज्योतिः नारायणस्स्वयं हरिः ॥
पारम्पर्यं न जानन्ति शिष्यमूर्तिर्न जायते ।

Colophon :

इति ब्रह्मविरचितं गुरुपारम्पर्यस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Guruparamparā

Remarks : The Ms. has scriptual blunders. But condition is good. The Ms. contains "Gurupratasmarana Stotra" also.

॥ गुरुप्रातस्स्मरणस्तोत्रम् ॥

23182. GURU PRATASMARANA STŌTRAM

Burnells Catalogue No. 8533. Substance—Paper. Size—$8\frac{1}{2} \times 4$ inches. Sheets – 2. Lines—6 to a page. Script—Devanagari. No. of Granthas–10. Author—Swayamprkāśa. Complete.

Beginning:

श्री गुरु गणाधिपशारदाभ्यो नमः ।
प्रातस्स्मरामि गुरुनाथपदारविन्दं
सौभाग्यसारमकरन्दरसानुवादम् ।
चित्ते परिस्फुटितसत्वदलप्रसारं
आनन्दमात्रमणिकर्णिकतत्परागम् ॥

End:

प्रातस्स्मरामि पदवीनिगमस्तुतिं यो
भक्त्या पठत्यनुदिनं गुरुपादसूत्रम् ।
सोऽनन्तसौख्यमधिकं गुरुमुद्दधानं
कैवल्यमेव कुलकोटिभिरोद्विभर्ति ॥

Colophon:

इति श्रीमत्स्वयंप्रकाशपूर्णाचार्येण विरचितं गुरुप्रातस्स्मरामि-स्तोत्रं सम्पूर्णम् ।

Subject : Praise on Guru in the morning.

Remarks : The Ms. is in good condition.

॥ गुरुभुजङ्गस्तोत्रम् ॥

23183. GURU BHUJANGA STŌTRAM

Burnell's Catalogue No. 8494. Substance—Paper. Size—5×2½ inches. Sheets—1. Lines—6 to a page. Script—Devanagari. No. of Granthas—10. Author? Incomplete.

Beginning:

श्रीकेशीराजाय नमः ।
सदङ्केशवायं चिदङ्केशवायं
सदानन्दयायं स्वयंकेशवायम् ।
परब्रह्म एवमिदं केशवायं
नमः केशवायं नमः केशवायाः ॥

End:

समं केशवायं खिलं केशवायं
निरामय निर्मोहय ... ...

Colophon:

श्री गुरुदशकभुजङ्गस्तोत्रम् ।

Subject: Praise on Guru in Bhujangapray meter.

Remarks: The Ms. has only one sheet and only one sloka.

॥ गुरुस्तोत्रम् ॥

23184. GURU STŌTRAM

Not noticed by Burnell No. 12754. Substance—Paper. Size—9×4 inches. Sheets—2. Lines—9 to a page. Script—Devanagari. No. of Granthas—25. Author? Complete.

Beginning:

श्री गणेशाय नमः ।
वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
शुक्लरक्तप्रभाभिन्नं शिवशक्त्यात्मकं गुरुम् ॥

End:

पुनस्स्तवः प्रणमेद्भक्त्या परमानन्दविह्वलः ।
विज्ञापयंस्तदाकारं भजंस्तत्सन्निधौ वसेत् ॥

Colophon:

इति आगमसारे ईश्वरपार्वतीसंवादे श्रीगुरुपुष्पाञ्जलिस्तोत्रं सम्पूर्णम् । श्रीनाथार्पणमस्तु ।

Subject: Praise on Guru in Āgamasāra

Remarks: The Ms. is in good condition.

GURU STŌTRAM

D.Nos	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks.
	N.N.B.					
23185	12761	Paper.	D. Nag.	25	4	Same as 23184
23186	B. 8498	,,	,,	15	2	Same as 23167 Named Gurvaṣṭakam.

॥ गुरुस्तवः ॥

23187. GURU STAVAḤ

G. K. D. Collection No. 30. Substance—Paper. Size—5 × 3 inches. Sheets—3. Lines—5 to a page. Script—Devanagari. No. of Granthas—10. Author? Complete.

Beginning:

श्रीगणेशाय नमः ।
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

End:

पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः ।
सदा मच्चित्तभावेन विधेहि भवदासनम् ॥

Colophon:

श्रीगुरुभ्यो नमः ।

Subject: Praise on Guru.

Remarks: The Ms. is in good condition.

॥ गुरुस्तोत्रम् ॥

23188. GURU STŌTRAM

Burnell's Catalogue No. 8499. Substance - Paper. Size—$4\frac{1}{4} \times 2\frac{3}{4}$ inches. Sheets—13. Lines—7 to a page. Script—Devanagari. No. of Granthas—75. Author? Complete.

Beginning:

श्रीगुरवे नमः ।
ओं अस्य श्री गुरुस्तोत्रमन्त्रस्य, हंस ऋषिः, गुरुरूपी
परमहंसपरमात्मा देवता । सोऽहं बीजम् । ओं बीजम् ।
पार्वत्युवाच — देवदेव महादेव सर्वज्ञ सकलेश्वर ।
लयात्प्रसादाद्भोस्स्वामिन् ममहर्षविवर्धन ॥

End:

ते सर्वे प्रलयं यान्ति आज्ञी काष्ट भस्म कृतम् ।
नश्यन्ति सकला रोगाः महामन्त्रनिपातिताः ॥

Colophon:

इति श्रीरुद्रयामलके परमहंसगुरुकल्पे उमामहेश्वरसंवादे
गुरुस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Guru with Anganyasa & Karanyasa.

Remarks: The Ms. has scriptual blunders.

॥ गुरुस्तोत्रम् ॥

23189. GURU STŌTRAM

Not noticed by Burnell No. 12760. Substance – Paper. Size – $5 \times 2\frac{3}{4}$ inches. Sheets—5. Lines—6 to a page. Script – Devanagari. No. of Granthas—20. Author? Complete.

Beginning:

श्री गुरुभ्यो नमः ।
गुरुप्रसादेन विना न मुक्तिः
गुरुप्रसादेन विना न भुक्तिः ।
गुरुप्रसादेन विना न विद्या
गुरुप्रसादेन कुलं न सम्पदः ॥

End:

मनुष्यचर्म बध्वा च साक्षात्परशिवस्स्वयम् ।
शिष्यानुग्रहणार्थाय गूढपर्यायदीक्षितः ॥

Colophon:

इति श्रीरुद्रयामलोद्दामके स्वरतन्त्रे उमामहेश्वरसंवादे
गुरुस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Guru in Rudrayamala.

Remarks: The Ms. is different from the previous one with the same title.

GURU STOTRAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks.
23190	N.N B. ,, 12761	P.	D.Nag.	25	4	Same as 23184

॥ गुरुस्तोत्रम् ॥

23191. GURU STŌTRAM

Burnell's Catalogue No. 8500 Substance—Paper. Size—5 × 3 inches. Sheets—4. Lines 7 to a page. Script—Devanagari. No. of Granthas—30. Author—Sri Sadāśivānanda Complete.

Beginning:

श्रीगणेशाय नमः ।
देवदेवेश विश्वेश विश्वव्यापिन्दयानिधे ।
विरिञ्चाद्यपरिज्ञेयः शुकानन्दगुरुः प्रभो ॥

End:

रचितं योगपूज्येन सदाशिवेन धीमता ।
गुरुनामकथालापसमाधौ सुखदं शुभम् ॥

Colophon:

इति सदाशिवानन्दनाथैर्विरचितं श्रीसद्गुरोः
क्रियास्तोत्रं सम्पूर्णम् ।

Subject: Praise on Guru composed by Sri Sadāśivānanda.

Remarks: The Ms. is different from the previous one with the same title.

॥ गुरुस्तोत्रम् ॥

23192. GURU STŌTRAM

Burnell's Catalogue No. 8501. Substance—Paper. Size—5×2 inches. Sheets—4. Lines—6 to a page. Script—Devanagari. No. of Granthas—25. Author? Complete.

Beginning:

श्री गुरुभ्यो नमः ।

समाश्रयेद्गुरुं भक्त्या महाविश्वासपूर्वकम् ।

विक्षिपेत्सर्वभारांश्च गुरोः श्रीपदपङ्कजे ॥

End:

यद्यत्सक्तं त्यजेत्पुण्यं तत्सर्वं गुरवेऽर्पयेत् ।

तेन तत्सफलं प्रोक्तं अन्यथा नरकं व्रजेत् ॥

Colophon:

इति श्रीस्कान्दपुराणे गुरुस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Guru in Skāndapurana.

Remarks: The Ms. is in good condition.

GURU STŌTRAM

D. No.	C. No. N.N.B.	Sub.	Script	No. of Granthas	Sheets	Remarks
23193	12768	P.	D. Nag.	25	5	Same as 23192

॥ गुरुपूजारहस्यस्तोत्रम् ॥

23194. GURU PUJĀ RAHASYA STŌTRAM

Burnell Collection No. 8503. Substance—paper. Size—7×4¼ inches. Sheets—8. Lines—10 to a page. Script—Devanagari. No. of Granthas—90. Author? Complete.

Beginning:

ओं नमश्चिद्घनचैतन्याद्वयतुलशीकृष्णात्मारामगोपाल-
शिवदत्तसद्गुरवे नमः । श्रीगणेशाम्बाद्वय कृष्णगुरवे नमः ।
श्रीदेव्युवाच–
देवदेव महादेव देवानां देवमुत्तमम् ।
गुरोस्तत्वप्रदीपिकां वद सोमकलाधर ॥

End:

शुभमस्तु च सर्वेषां कल्याणं सर्वदेहिनाम् ।
भव मोक्षकरो ग्रन्थः स्वगुरोः कृपया मया ॥

Colophon:

इति श्रीमद्विश्वोद्धारे उमामहेश्वरसंवादे गुरुपूजा-
रहस्यं नाम नवमोऽध्यायः ॥ श्रीअविनाशरामायनमः ।

Subject: Praise on Guru in Viśvōdhāra

Remarks: The Ms. is in good condition.

GURUPUJĀRAHASYA STŌTRAM

D.Nos.	C.Nos. N.N.B.	Sub.	Script	No. of Granthas	Sheets	Remarks
23195	12762	Paper	D. Nagri.	90	16	Same as 23194

॥ गुरुवन्दनम् ॥

23196. GURUVANDANAM

Burnell's Catalogue No. 8495. Substance—Paper. Size—4½×3 inches. Sheets—8. Lines—8 to a page. Script—Devanagari. No. of Granthas—50. Author? Complete.

Beginning:

श्री गुरुभ्यो नमः ।

देव्युवाच — यत्कटाक्षमहामेरुं अहमाश्रित्य नित्यशः ।
सुभगास्मि कृतार्थास्मि गुरुनाथं तमाश्रये ॥

End.

श्रीगुरुप्रसादेन विना न मुक्तिः
गुरुप्रसादेन विना न भुक्तिः ।
गुरुप्रसादेन विना न विद्या
गुरुप्रसादेन विना न सम्पदः ॥

Colophon:

इति श्रीज्ञानार्णवे नित्यतन्त्रे ईश्वरपार्वतीसंवादे गुरुवन्दनं सम्पूर्णम् ।

Subject: Praise on Guru in Gnanarnavah.

Remarks: Same as 23170 with slight change. But its name is given as Vandana. The Ms. has scriptual blunders.

॥ गुर्वष्टोत्तरशतम् ॥

23197. GURVASTŌTTRA SATAM.

Burnell's Catalogue No. 7410. Substance—Paper. Size—4¼×3 inches. Sheets—4. Lines—7 to a page. Script—Devanagari. No. Granthas—20. Author? Complete.

Beginning:

श्री गुरवे नमः ।
अस्य श्रीगुर्वष्टोत्तरशतनाममालामन्त्रस्य, श्रीगुरुप्रीत्यर्थे
अष्टोत्तरशतनामजपे विनियोगः ।
परञ्ज्योतिः परं ब्रह्म परमात्मा परात्परः ।
सच्चिदानन्दा अनन्त अपाराय असक्ष्याय ।।

End:

अष्टोत्तरशतनामानि यः पठेद्यदि वा जपेत् ।
सर्वसिद्धिमवाप्नोति भुक्तिमुक्ती न संशयः ।।

Colophon :

इति गुर्वष्टोत्तरशतनाम सम्पूर्णम् ।

Subject: 108 Sacred names of Guru.

Remarks: The Ms. has scriptual blunders.

।। ज्वरहरस्तोत्रम् ।।

23198. JVARAHARA STŌTRAM.

Burnell's Catalogue No. 8813. Substance—Paper. Size—8×5 inches. Sheets—4. Lines—13 to a page. Script—Devanagari. No. of Granthas—60. Author? Complete.

Beginning:

श्रीगणेशाय नमः ।
वैशम्पायन उवाच–
भज्यमानेष्वनीकेषु त्रातुकामस्समभ्ययात् ।
ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।।

End :

एवमुक्तस्तु कृष्णेन ज्वरस्साक्षान्महात्मना ।
प्रोवाच यदुशार्दूलमेवमेतद्भविष्यति ।।
वरंलब्ध्वा ज्वरो हृष्टः कृत्वा च समयं पुनः ।
प्रणम्य मनसा कृष्णं अपाक्रामत्ततो रणात् ।।

Colophon :

इति हरिवंशे ज्वरहरस्तोत्राध्यायः । ज्वरहरस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Jvarahara in Harivamsa.

Remarks : The Ms. is in good condition.

।। ज्वरहरस्तोत्रम् ।।

23199. JVARAHARA STŌTRAM

Burnell's Catalogue No. 8814. Substance—Paper. Size—10×4 inches. Sheets—3. Lines—7 to a page. Script—Devanagari. No. of Granthas—20. Author ? Complete.

Beginning:

श्रीवेदव्यासाय नमः ।
श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं अमुकगोत्रायाः अमुकनाम्नयाः
अमुकराशौ अमुकनक्षत्रे अमुकचरणे जातायाः... ... ...
जपं करिष्ये । हरिवंशे ज्वर उवाच —
नमामि त्वामनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंहारहेतुं यत्तद्ब्रह्मलिङ्गं प्रशान्तम् ।।

End:

हृत्पद्ममध्ये पुरुषं पुराणं नारायणं शाश्वतमप्रमेयम् ।
विचित्य सूयादिति राजमानं मृत्युं स योगी चितवान्बलिष्ठः ।।

Colophon:

इति गरुडपुराणे मृत्योरष्टकस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Jvarahara in Harivamsa.

Remarks: The Ms. is different from the previous one with the same title. This contains Mritya Aṣtaka also.

JVARAHARA STŌTRAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks
23200	T. S. 869	Paper.	D. Nagri.	45	7 (4-10)	Same as 23198 But wants beginning. So this is an incomplete Ms. This Ms. was Catalogued in D 22261.

॥ त्रयश्लोकी ॥

23201. TRAYA SLŌKI

Not noticed by Burnell No. 15097 (Tag. 74). Substance—Paper. Size—16 × 1¼ inches. Leaves—1 (57th). Lines—9. 10 to a page. Script—Grantha. No. of Granthas—10. Author—Parāṣara Bhattah Complete.

Beginning:

शुभमस्तु ।
श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीम.....मेस्तु श्रेयसे ॥
चित्कर्मानुगतेश्वरेक्षणवशात् प्राप्तं शरीरं जडं
त्रैगुण्यान्वयि दुःखदायि परिमाण्यस्थायि विद्याहरम् ।
साङ्गं प्राक्तदुःखसञ्चितमनेकं बुद्धिपूर्वक्रिया-
पेतं धार्यनियाम्यशेषमुपधेर्नृणामिदं शब्दितम् ॥

End:

सर्वेशोऽपि सदातनोऽखिलजगद्व्याप्तावबोधामला-
नन्ताकारयुतोऽपि अनन्तसुगुणस्सर्वात्मनां साचिताम् ।
देही धारणशासनेशनमुखैस्स्वाधीनवृत्तिक्रिया-
भोगो नित्यमनोज्ञमङ्गलवपुः श्रीभूमिनीलाधिपः ।।

Colophon: ओं ।

Subject: Praise on Sri Vishnu in three slokas.

Remarks: The Ms. is in decaying condition.

।। त्रैलोक्यमण्डनकवचम् ।।

23202. TRILŌKYA MANDANA KAVACAM

Burnell Catalogue No. 12041. Substance—Palm Leaf. Size—8×1¼ inches. Leaves–3. Lines—7 to a page. Script—Telugu. No. Granthas Author? Complete.

This stotra is not available in this Mss.

।। दयाशतकम् ।।

23203. DAYĀ ŚATAKAM

Not noticed by Burnell No. 15071 (Tag. 48). Substance—paper. Size—18×1½ inches. Leaves–5. Lines—9 to a page. Script–Grantha. No. of Grānthas—200. Author—Sri Vedanta Desika. Complete.

Beginning:

श्री वेदान्तगुरवे नमः ।
शुक्लाम्बरधरं + शान्तये ।

श्रीमान्वेङ्कटनाथार्यः + सदा हृदि ।
ओं, प्रपद्ये तं गिरिं प्रायः श्रीनिवासानुकम्पया ।
इक्षुसारस्रवन्त्येव यन्मूर्त्या शर्करायितम् ॥

End:

दृष्टेऽपि दुर्बलधियं दमनेऽपि दृप्तं
स्नात्वापिधूलिरसिकं भजनेऽपि भीरुम् ।
बध्वा गृहाण वृषशैलपतेर्दये मां
त्वद्वारणं स्वयमनुग्रहशृङ्खलाभिः ॥

Colophon:

हरिः ओं, शुभमस्तु ।

Subject: Praise on Sri Daya of the Venkatesa in 100 slokas composed by Vedanta Desika.

Remarks: The Ms. is in good condition.

॥ दयाशतकव्याख्या ॥

23204. DAYĀSATAKA VYĀKHYĀ

Not noticed by Burnell No. 15070 (Tag. 47). Substance—Palm Leaf. Size—16½ × 1½ inches. Leaves—33. Lines—8 to a page. Script — Telugu. No. of Granthas — 1000. Author? Incomplete.

Beginning:

हरिः ओं ।
यस्य द्विरदवक्त्राद्याः + तमाश्रये ॥
शुक्लाम्बरधरं+विघ्नोपशान्तये ॥
वाधूल श्रीनिवासार्यपादाब्जरजसे नमः ।
यदूरीकरणाद्दूरीभवेद्ध्रुवमहार्णवः ॥

End :

अस्माकं पद्यानां स्वकर्तृकत्वमनुज्ञातं अस्मद्यद्यत्वादेव
मथ परस्परं करम्बितानि संसक्तानि गुणाश्चावद्यानि च
येषु तानि.....

Colophon : Nil

Subject : Praise on Daya of the Venkatesa with commentary.

Remarks : The Ms. is in good condition.

॥ दारिद्र्यविद्रावणस्तोत्रम् ॥

23205. DĀRIDRYA VIDRĀVANA STŌTRAM

Not noticed by Burnell No. 13555. Substance—Paper. Size— 7¼×4 inches. Sheets—1. Lines—8 to a page. Script—Devanagari. No. of Granthas—10. Author—Sri Sankara. Complete

Beginning :

श्रीगणेशाय नमः ।
सुवर्णवर्णसिन्दूरशितैकदन्तबन्धुरं ।
गृहीतपाशकाङ्कुशं वरप्रदाऽभयप्रदम् ।
चतुर्भुजं त्रिलोचनं भुजङ्गमोपवीतिनं
प्रफुल्लवारिजासनं भजामि सिन्धुराननम् ॥

End:

मदोपलुब्धचञ्चरीकमञ्जुगुञ्जितप्रब-
न्धचित्तरञ्जनप्रमोददत्तकर्णतालकम् ।
अनन्यभक्तिमानवप्रचण्डमुक्तिदायकं
भजामि नित्यमादरेण वक्रतुण्डनायकम् ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितं दारिद्र्यविद्रावणस्तोत्रं सम्पूर्णम् ।

Subject: Praise on Ganapati for Daridrayavidravana by Sri Sankara.

Remarks: The Ms. is in fairly good condition.

॥ द्वादशार्यास्तोत्रम् ॥

23206. DWĀDASARYA STŌTRAM

J.L. Collection. Bundle 4, No. 20. Substance—paper. Size—5×3½ inches. Sheets—2 (1 and 3). Lines - 10 to a page. Script – Devanagari. No. of Granthas—15. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।

अस्य श्री द्वादशार्यास्तोत्रमन्त्रस्य, साम्बऋषिः, आर्याच्छन्दः

श्रीसूर्यनारायणो देवता ।

उद्यन्नद्य विवस्वान् आरोहन्नुत्तरां दिशं देवः ।

हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशयतु ॥

End:

जिज्जातवेदोऽरणये सुराध्वमणये नमः ।

रोगमातङ्गसृणये सहस्रधृणये नमः ॥

Colophon:

इति द्वादशार्यास्तोत्रं सम्पूर्णम् ।

Subject: Praise on Surya in slokas

Remarks: In this Mss. second page is missing. So it is an incomplete Mss.

॥ देशिकस्तोत्रम ॥

23207. DESIKA STOTRAM

Burnell's Catalogue No. 12262 लृ. Substance—Paper. Size—10×1 inches. Leaves—4 (22-25). Lines—6 to a page. Script—Telugu. No. of Granthas—50. Author? Complete.

Beginning:

शिवः—अथ देवि महागुह्यं शृणु सर्वार्थसाधकम् ।
शान्तिकं देशिकस्तोत्रं सारभूतं वदामि ते ॥

End:

स्वात्मज्ञानं च लभते सर्वशत्रुवशं तथा ।
मन्त्राणां सिद्धिभेदं च भोगभाग्यं जयं तथा ॥
अमरारोग्यमृद्धिं च सर्वसौख्यं भवेद्ध्रुवम् ।

Colophon:

इति श्रीआकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वर-
संवादे देशिकस्तोत्रं नाम सप्तपञ्चाशोऽध्यायः ।

Subject: Praise on Desika in Akasabhiravа.

Remarks: The Ms. is in decaying condition.

॥ धर्मराजस्तोत्रम ॥

23208. DHARMARAJA STOTRAM

G. K. D. 229. Substance—Paper. Size—8¼×3½ inches. Sheets—4. Lines—7 to a page. Script—Devanāgarī. No. of Granthas—25. Author? Complete.

Beginning:

श्री शिवप्रसन्न । धर्मराजस्तोत्रप्रारम्भः ।
धर्मराज नमस्तेऽस्तु साक्षाद्धर्मस्वरूपिणे ।
धर्मिष्ठशान्तरूपाय सत्यरूपाय ते नमः ॥

End:

यमाय धर्मराजाय चित्रगुप्ताय ते नमः ।
भूयो भूयो नमस्तुभ्यं भक्तरक्षाकृते नमः ॥

Colophon:

इति धर्मराजस्तोत्रं सम्पूर्णम् ।

Subject: Praise on yama.

Remarks: The Ms. is in good condition

॥ नक्षत्रमालिका ॥

23209. NAKSHATRA MALIKA

Not noticed by Burnell No. 15140 (Tag. 119). Substance—Palm leaf. Size—$7\frac{3}{4} \times 1$ inches. Leaves — 3 (87-89). Lines—8 to a page. Script—Grantha. No. of Granthas—30. Author? Complete.

Beginning:

विकसत्कदम्बकलिकाविसरन्नवरेणुशोभागण्डतलाम् ।
विद्यां परामुपास्ये विद्योदितविविधभुवनतत्वकलाम् ॥

End:

त्वत्पादपङ्कजरसे भृङ्गीभवदस्ति यस्य चित्तमसौ ।
अष्टौ कलयति सुधीरपि नव मनुजो निधीनवाप्नोति ॥

Colophon:

इति नक्षत्रमालिका सम्पूर्णा ।

Subject: Praise on Parāśakti in 24 slokas.

Remarks: The Ms. is in fairly good condition.

॥ नदीस्तोत्रम् ॥ [गङ्गाष्टकम्]

23210. NADI STOTRAM

Not noticed by Burnell No. 15137 (Tag. No. 116) Substance — Palm Leaf. Size 9×1 inches. Leaves—4. Lines—4. to a page. Script—Grantha. No. of Granthas—15. Author—Sri Vālmīki Complete.

Beginning:

क्रूरं दुष्टतमं विनष्टमनसं भग्नव्रतं रोगिणं
निर्लज्जं कृपणं कृतघ्नमनिशं वह्वाशनं हिंसकम् ।
आशापाशशतप्रबद्धमनिशं दुष्कृत्यभाजं जडं
कारुण्याकर भो पितः पशुपते दोषाकरं पाहि माम् ॥

End:

गङ्गाष्टकं यः पठति प्रभाते वाल्मीकिना विरचितं
शुभं मनुष्यः ।

Colophon:

इति गङ्गाष्टकं सम्पूर्णम् ।

Subject: Praise on Ganga composed by Sri Valmiki.

Remarks: The Ms. is in bad condition. Leaves of Ms. are brokan.

॥ नदीस्तोत्रम् ॥

23211. NADI STOTRAM

Not noticed by Burnell No. 15159 (Tag. 138) Substance—Palm Leaf. Size—11½×1 inches. Leaves—2. Lines—5 to a page. Script - Telugu. No. of Granthas—15. Author? Complete.

Beginning:

नदीस्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशकम् ।
भागीरथी महापुण्या यमुना च सरस्वती ॥

End:

काले जन्मार्जितं पापं तत्क्षणादेव नश्यति ।
ब्रह्महत्यादिपापेभ्यः मुच्यते नात्र संशयः ॥

Colophon:

इति नदीस्तोत्रं सम्पूर्णम् ।

Subject: Praise on River (Nadi)

Remarks: The Ms. is diffrent from the previous one with the same title. The Ms. is in fairly good codition.

———

NADI STOTRAM

D.Nos.	Collection Nos.	Sub.	Script	No. of Granthas	Sheets	Remarks.
23212	N.N.B. 15170 Tag. 150	P. L.	Grantha & Telugu	...	...	This stotra is not available in this Ms.
23213	15180 Tag. 160	,,	Telugu	15	2	Same as 23210 The Ms. is in bad condition.

NYĀSA VIMSATIH

D.Nos.	C.Nos.	Sub.	Script	No. of Grantha	Sheets	Remarks
23214	B. 12274	P. L.	Grantha	40	4	Same as 21239

॥ नानास्तोत्रम् ॥

23215. NĀNĀ STOTRAM

Burnell Catalogue No. 8302. Substance–Paper. Size–$7\frac{1}{2} \times 5$ inches. Sheets—8. Lines – 11 to a page. Script—Devanagari. No. of Granthas–120. Author ? Complete.

Beginnirg:

श्री गणेशाय नमः । श्रीकुलदेवतास्वामिने नमः ।
मम चतुर्विधपुरुषार्थसिद्धयर्थं इष्टकाम्यार्थसिद्धयर्थं नित्य-
स्तोत्रपारायणं करिष्ये । सुमुखश्चैकदन्तश्च + विघ्नस्तस्य न
जातते ।

End:

सरितस्सागराश्शैलाः तीर्थानि जलदानदाः ।
एत्वेत्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
पुण्याहवाचनप्रकारः ।

Colophon:

श्रीसाम्बशिवार्पणमस्तु । श्रीरस्तु ।

Subject : Praise on Navagraha for Santhi.

Remarks : The Ms. is in good condition.

॥ नानाविधदेवताध्यानम् ॥

23216. NANAVIDHADEVATA DHYANAM

Burnell's Catalogue No. 12238. Substance—Palm Leaf. Size—10½ × 1¼ inches. Leaves - 107. Lines—7 to a page. Script Grantha. No. of Granthas—1500. Author ? Complete.

Beginning:

बालगणपतिध्यानम् ।
करस्थकदलीचूतपनसेक्षुकमोदकम् ।
बालसूत्रवृताकारं वन्दे बालगणाधिपम् ॥

End:

ऋषभध्यानम् —
रजतनिभशरीरं वेदवादमुखोत्थितं
अरुणमुदितशृङ्गं अग्निवर्णं त्रिनेत्रम् ।
कलगलमणिमालं किङ्किणीदामभूषं
हरिदनथर्म्मरूपं आदिदेवं विशेषम् ॥

Colophon : Nil.

Subject : Praise on Nanavidha Devata for Dhyana.

Remarks The Ms. has scriptual blenders. It's condition is good.

॥ नामपठनस्तोत्रम् ॥

23217. NAMA PATHANA STOTRAM

Burnell Catalogue No. 8808. Substance—Paper. Size - 8 × 4 inches. Sheets—1. Lines — 9 to a page. Script Devanagari. No. of Granthas - 10. Author ? Complete.

Beginning:

श्रीगणेशाय नमः ।

पक्षिण ऊचुः—

एवमुक्त्वाऽयमुनयो मार्कण्डेयो महामुनिः ।

विसर्ज्य क्रौष्टिकमुनिः चक्रे माध्याह्निकीं क्रियाम् ।।

End:

अष्टादशपुराणानां नामधेयानि यः पठेत् ।

त्रिसन्ध्यं जपतो नित्यं अश्वमेधफलं लभेत् ।।

Colophon:

इति श्रीमार्कण्डेयपुराणे पुराणानां नामपठनस्तोत्रं सम्पूर्णम् ।

Subject: Names of Purānās in Mārkandēya Purāna.

Remarks: The Ms. is in good condition

॥ नामाहुतिः ॥

23218. NĀMĀH HUTIH

Burnell's Catalogue No. 8116. Substance—Paper. Size—9×4 inches. Sheets—3. Lines—9 to a page. Script Devanagari. No. of Granthas—20. Author ? Complete.

Beginning:

नामहुतिः—

पावमानाय नमः, प्रसन्नाय नमः, पुरुष्टुताय नमः,

भूतावासाय नमः, शार्ङ्गिणे नमः, खड्गवासाय नमः ।

End:

ब्रह्मसूत्रनिर्णीताय नमः, व्यासशिष्याय नमः, यतीश्वराय नमः शङ्करादिपूजिताय नमः, श्वसन्ततिप्रवर्तकाय नमः, ज्ञानमोक्ष-प्रदायकाय नमः ।

Colophon:

इति नामाहुतिः समाप्ता ।

Subject: Sacred names of yatiswara, Lakshmi and Hanumad-Bhimou.

Remarks: The Ms. is in fairly good condition.

॥ पञ्चतत्वात्मकस्तोत्रम् ॥

23219. PANCA TATVĀTMAKA STOTRAM

Burnell's Catalogue No. 8790. Substance—paper. Size—6×3½ inches. Sheets—7. Lines — 7 to a page. Script — Devanagari. No. of Granthas—45. Author—Dattatreya. Complete.

Beginning:

श्री सच्चिदानन्दगुरवे नमः ।

ऐं ह्रीं श्रीं प्रकृति अहंकार बुद्धिमनश्च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण-
वाक्पाणिपादपायूपस्थ शब्दस्पर्शरूपरसगन्ध आकाशवायु-
वह्निसलिलभूम्यात्मने अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं
अं अः ऐं ह्रीं श्रीं आत्मतत्वाय ।

End:

आत्माऽहं सर्वकोशेषु ब्रह्मान्तमशकादिषु ।
चैतन्योऽहं स्वप्रकाशो ब्रह्मान्तमशकादिषु ॥

दत्तेन कथितं गुह्यं शिष्याणां प्रीतिपूर्वकम् ।
सर्वदा यः पठेद्योगी जीवन्मुक्तो भवेद्ध्रुवम् ॥

Colophon:

इति दत्तात्रेयप्रणीतं पञ्चतत्वात्मकं स्तोत्रं सम्पूर्णम् ।

Subject : Praise on five Tattvas by Dattātrēya.

Remarks : The Ms. is in good condition.

॥ पञ्चमीस्तवराजः ॥

23220. PANCAMI STAVARĀJAH

J. L. Collection Bundle No. 6/No. 4. Substance — Paper. Size—11×4½ inches. Sheets—6. Lines—13 to a page. Script — Devanagari. No. of Granthas — 150. Author ? Complete.

Beginning:

श्री गणेशाय नमः ।

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।

शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥

End :

साधकानां हितार्थाय सर्वसिद्धिकरं परम् ।

तत्सर्वं शम्भुना प्रोक्तं आचार्येणैव कीर्तितम् ॥

Colophon :

इति श्रीरुद्रयामले बहुरूपाष्टकप्रस्तारे शतसहस्र-

कोटिविस्तारे पञ्चमीस्तवराजस्तोत्रं सम्पूर्णम् ।

Subject : Praise on Pancami.

Remarks : The Ms. is in fairly good condition.

॥ परमहंसकवचम् ॥

23221. PARAMAHAMSA KAVACAM

Burnell's Catalogue No. 8401. Substance—Paper. Size—8×4 inches. Sheets—3. Lines—9 to a page. Script—Devanagari. No. of Granthas 40. Author? Complete.

Beginning:

श्रीगणेशाय नमः ।
पार्वत्युवाच–भगवन्सर्वधर्मज्ञ सर्वतन्त्रविशारद ।
कवचं श्रोतुमिच्छमि हंसस्य परमस्य च ॥

End:

शिष्याय ज्ञानरूपाय गुरुभक्ताय शान्तये ।
आत्मभूतसुभक्तेभ्यः दत्वा मृत्युमवानुयात् ॥

Colophon:

इति श्रीरुद्रयामले परमहंसकवचं सम्पूर्णमस्तु ।

Subject: Praise on Paramahamsa.

Remarks: The Ms. is in decaying condition.

॥ प्रणवकवचम् ॥

23222. PRANAVA KAVACAM.

